नं० ४८३२ – घ

चातुर्मास्ययज्ञपद्धति – सुबोधिनी (पूर्ण)

पत्राणि ८०

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४७३२-घ

चातुर्मास्ययज्ञपद्धतिः सुबोधिनी

नं० ४७३२-घ
पत्राणि-९० (नवतिः) (पूर्ण)

© Dharmartha Trust J&K. Digitized by eGangotri

पद्धतिः ।

पा २३ क चातुर्मास्यपत्र ८१ पाठकरामचन्द्रशर्मणः

२३००

© Dharmartha Trust J&K. Digitized by eGangotri

१ श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥विनायकंशिवंसांबंगुरुंनत्वाविरच्यते॥चातुर्मास्याख्यय
ज्ञानांपद्धतिःसुखबोधिनी॥१॥इहतावद्धविःसंस्थास्वगणितानिचातुर्मास्यानि॥ततःसंस्थानां
नित्यत्वाच्चातुर्मास्यान्यपिनित्यानि॥यद्यपिप्रजापतिर्हप्रजातिकामइत्युपक्रम्यचतुर्दशेमहाके
बीनकिंकृतिःश्रूयतेतेनप्रजातिकामोयजेतेतितथापिसोत्पत्तिविधिप्रशेचनापरत्वेनार्थवा
दपरेतिज्ञेयं॥अन्यथाअक्षय्यंहवैचातुर्मास्ययाजिनःफलंभवतीतिश्रुत्यंतरविरोधःस्यात्।
तथाचाग्निहोत्रादीनांमनुरप्ययावज्जीवप्रयोगत्वेननित्यतांबोधयति॥अग्निहोत्रंचजुहुया
दाद्यंतेद्युनिशोःसदा॥दर्शेनचार्धमासांतेपौर्णमासेनचैवहि॥सस्यांतेनवसस्येष्ट्यातथर्त्वंतेद्वि राम
जोध्वरैः॥पशुनात्वयनांतेनसमांतेसौमिकैर्मखैः॥तथा॥तेषामसंभवेकुर्यादिष्टिंवैश्वानरींद्विजः॥ १

मिके १

© Dharmartha Trust J&K. Digitized by eGangotri

इत्यनुकल्पविधानादपि नित्यतैव॥ तस्माद्यावज्जीवप्रयोगाण्येव चातुर्मास्यानि यथाकथंचित्प्रतिव
र्षमनुष्ठेयानि॥ तत्र तावत्तु यज्ञाचार्येण स्वसूत्रात्यनुसारेण प्रतिपर्वीव्याख्यानि स्वचितानि॥ अत तत्
त्सूत्रानुसारेण तान्येव प्रदर्श्यन्ते॥ यथा॥ फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा मलमासादिनिर्दुष्टायां प्र
तिसंवत्सरं प्रयोगारंभः॥ तत्र वसिष्ठः॥ वापीकूपतडागादिप्रतिष्ठां यज्ञकर्म च॥ न कुर्यान्मल
मासे तु महादानव्रतानि चेति न तु नित्यं नैमित्तिकं कुर्यात्प्रयतः सन्मलिम्लुचे॥ इति नित्यनैमि
त्तिकयोः कर्त्तव्यतास्मृत्यन्तरेणाभिहिता तत्किमिति चेन्न॥ समंततत्र मासविशेषनाम निरपेक्षमाव
श्यकं यद्विहितं तन्नित्यं। तत्तु मलमासेपि कार्यं॥ यथान्यारब्धाग्निहोत्रहोम दर्शपूर्णमास नित्यश्रा
द्धं पंचमहायज्ञा [illegible] तिथिपूजा देवपूजा संध्यादिकं॥ यस्याकरणे प्रत्यवायः श्रूयते॥ न तु नित्यमा

© Dharmartha Trust J&K. Digitized by eGangotri

२ त्रैपक्षादिकमपि॥ यत्तु सोमचातुर्मास्यादीनां नित्यानामपि मलमासेऽननुष्ठितानां मासांतरेऽनुष्ठानसमय
स्याविद्यमानत्वात् उत्तरे दैवकार्याणीति देवलवचनात्॥ यत्तु मात्स्ये आधानं यज्ञकर्मापि प्रायश्चित्तव्रता
नि च॥ न कुर्यान्मलमासेपि शुक्रगुर्वोस्तथा लवे॥ इति गुरुशुक्रयोरस्तेपि सामान्यतो निषेधः श्रूयते तस्यापि
प्रथमारंभे एवावकाशः॥ नित्योपात्तानामकरणे दोषश्रवणात् उत्तरकालासंभवाच्चावृत्तौ गुरुशुक्रयो च
रस्ते एव आरंभणीयानि चातुर्मास्यानीति सिद्धम्॥ अथ वैश्वदेवादिपर्वचतुष्टयवाच्यार्थानां चातुर्मास्या
नां फाल्गुने मासि पूर्वस्यां पौर्णमास्यां प्रयोगारंभः कर्त्तव्यः॥ उत्तरस्यां प्रधानयागः॥ अयं चारंभो मातृ
यजनपूर्वकमाभ्युदयिकं कृत्वा कर्त्तव्यः॥ तदुक्तं मात्स्ये॥ नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेदिति॥
ततः श्राद्धोत्तरं प्रथमाङ्गं चां वैश्वानर्यार्जन्येष्टिं कुर्यात् १ सा च प्रतिवर्षमावर्त्तते॥ चातुर्मास्यान्यारप्स्यमा राम २

© Dharmartha Trust J&K. Digitized by eGangotri

णोवैश्वानरीयपार्जन्ययायजेतेतिचरकाणामारंभसंयोगेनविधानात्॥ नन्वत्र प्रकृतप्रपूर्वस्यकार्त्तुः
प्रवर्त्तनमारंभः॥ द्वितीयादिप्रयोगेचनाप्रकृतप्रपूर्वःकर्त्तास्ति अतःआरंभाभावात् द्वितीयादिप्रयोगेसा
नभविष्यतीतिचेत् मैवं यतःकरिष्यमाणस्यकर्मणःप्रथमोयःपदार्थःसप्रारंभउच्यते॥ सचपुनःपु
नरपिक्रियामारभमाणस्यभवत्येव॥ प्रतिदिनमपिपाकंकुर्वन्पाकमारभतइतिह्युच्यते॥ अतश्चा
तुर्मास्यप्रकृतौतदारंभार्थीयावैश्वानरपार्जन्यायाआवृत्तिःसिद्धाभवति॥ इतरथाहिद्वितीयादिप्र
योगेआरंभत्वाभावान्नस्यात्॥ कृतत्वात्॥ अन्वारंभणीयातुचातुर्मास्यानांप्रथमारंभेपि ऋक्
शाखिनांनभवत्येव॥ पूर्वौदर्शपूर्णमासाभ्यामन्वारंभणीयेष्टिरितिदर्शपूर्णमासयोरेवप्रथमारं
भेपूर्वांगत्वेनविधानात्॥ एवंचितस्थायंविषयःश्राग्नावैश्वदेवीचयपृश्यमाणस्येतिसूत्रभाष्ये॥ अ

© Dharmartha Trust J&K. Digitized by eGangotri

३ त्रमक्षशाखिनांसर्वत्रेष्टिपशुबंधेषुयजमानएवोद्धरणोग्न्यन्वाधानेकुर्यात्॥यजमानाधिकारेच
दितत्वात्॥तत्रप्रयोगः॥वैश्वानरपार्जन्येष्ट्यर्थंगार्हपत्यादाहवनीयमुद्धरामि॥गार्हपत्याद्दक्षिणा
3 ग्निमाहरामीति॥ततोन्वाधानंममाग्नेवर्चइत्यादिना॥कौषीतकंविहव्येनेत्युक्तत्वात्॥ततोब्रह्म
वरणं॥यथा॥अमुकसगोत्रअमुकामुकशर्मन्चातुर्मास्यांगभूतयान्वाहार्यदक्षिणयावैश्वानर
पार्जन्येष्ट्याहंयक्ष्येतत्रमेत्वंब्रह्माभवेति॥ततोब्रह्मणआसनसंस्कारःसमंत्रकः॥सर्वकर्मणांच
स्त्रा साहृयं॥यजमानस्त्वसीमाहे॥ततआसन्नेहविषिहविःसंमर्शनेव्रतग्रहणेचकृतेएहिहोतरितिहो
तुःप्रैषेहोताआचम्यदक्षिणाहृत्यणीतोत्कराववतरेणप्रपद्यप्रशांतिवद्धर्हिराक्रम्यकंप्रयघादिसम
दशसामिधेनीरनूच्यपरिश्चरसीत्यंतंजर्यात्॥ततःआवाहने॥अग्निमग्नआ४वह॥सोममा४वह॥ राम ३

© Dharmartha Trust J&K. Digitized by eGangotri

वैश्वानरमा४वह।।पर्जन्यमा४वह।देवां आज्यपां इत्यादि।।उत्तमे प्रयाजे।।स्वाहाग्निं स्वाहा सोमं स्वाहा वैश्वा
नरं स्वाहा पर्जन्यं स्वाहा देवा इत्यादि।।वा वैश्वावाज्यभागौ।।वैश्वानरायानुब्रू४हीत्युक्ते।।ऋतावानं वैश्वान
रमृतस्य ज्योतिषस्पतिं।।अजस्रं भानुमीमहे मिति ब्रूल्यजाद्वरीन्तु वाक्या वैश्वानरं यजेत्युक्ते भूर्भुवः।।
ये४यजामहे वैश्वानरं नाभिं यज्ञानां सदनं रयीणां महामाहावमभिसंनवंत।।वैश्वानरं रथ्यमध्वराणां
यज्ञस्य केतुं जनयंत देवा४वौ४षट् उजः सहः सह उजः स्वः इतियाज्या।।पर्जन्यायानुब्रू४हीत्युक्ते।।
पर्जन्याय प्रगायत दिवस्पुत्राय मीढुषे।।सनो यवसमिच्छतो३म्।।उदीरनु।।पर्जन्यं यजेत्युक्ते।।भूर्भुवः ये४
न यजामहे पर्जन्यं यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति।।यस्य व्रत ओषधीर्विश्वरूपाः
सनः पर्जन्य महि शर्म यच्छ।।४वौ४षट्।।उज।।इति पर्जन्यस्य याज्या।।नित्ये स्विष्टकृतः।।पिशीहि देवा

© Dharmartha Trust J&K. Digitized by eGangotri

६ नितिष्ठुरोन्तु॰।म्रू॰।ये हेग्निं स्विष्टकृतमयाल ग्निरग्नेः प्रियाधामान्ययाट् सोमस्य प्रिया॰ वैश्वानरस्य प्रि
5 या॰ पर्जन्यस्य प्रियाः देवानामित्यादि प्रकृतिवत्॥ सूक्तवाके॥ अग्निर्ह॰ हात॥ सोमो ह॰ हात॥ वैश्वानरो
हविरज्जुषतावीवृधत महोज्यायो कृत॥ पर्जन्योह॰ कृत॥ देवा आज्यपाः स्त्याद्यावनीयोपस्थानांतं प्रकृ ह
तिवत्॥ अथ त्यागाय यजमानस्य॥ प्रयाजेषु च तत्तु प्रकृतिवत्॥ उत्तमे प्रयाजे॥ इदमग्नये सोमा
य वैश्वानराय पर्जन्याय देवेभ्य आज्यपेभ्यः॥ प्रधानस्य॥ इदं वैश्वानराय॥ इदं पर्जन्याय॥ इद
मग्नये स्विष्टकृते॥ सूहने॥ वैश्वानरस्य पर्जन्यस्योज्जिति॰॥ वैश्वानरः पर्जन्यस्तमपनुदतां॰॥ सूक्त
वाके॥ इदमग्नये सोमाय वैश्वानराय पर्जन्याय देवेभ्य आज्यपेभ्यो ग्नये होत्राय इत्यादि॥ अन्यत्स
र्वं स यजमानं प्रकृतिवत्॥ यदा च कात्यायनाः वैश्वानरं स विशेषणं कुर्वंति॥ तदा आवाहने॥ अ राम ६

© Dharmartha Trust J&K. Digitized by eGangotri

ग्निं वैश्वानरमा॰ हेत्यादि। तन्नमिष्ठयाजे॥ स्वाहाग्निं वैश्वानरमित्यादि॥ प्रधाने॥ अग्नये वैश्वानरा
यानुब्रूहीत्युक्ते॥ वैश्वानरो न ऊतय आप्रयातु परावतः॥ अग्निर्नः सुष्टुतीरुपो३ मृ॰ त्तुरो॰॥ अग्निं
वैश्वानरं यजेत्युक्ते॥ पू॰ ये॰ हे अग्निं वैश्वानरं पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा
विवेश॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तं४ वौ४ षट्॥ तु जः। इति याज्या।
अग्नेर्वैश्वानरस्य प्रिया धामान्ययाळिति स्विष्टकृति॥ अग्निर्वैश्वानरो हवि॰ जुषतेति सूक्तवाके॥
त्यं इदमग्नये वैश्वानरायेति सर्वत्र त्यागेषु॥ वैश्वानरयाजे न्येष्टिः स माप्ता॥४॥ अथ वैश्वदेवाख्यं
पर्वोच्यते॥ तस्मिन्नेवाह्नि उद्धरणं तत्र प्रयोगः॥ वैश्वदेवपर्वार्थं गार्हपत्यादाहवनीयमुद्धरा
मि॥ गार्हपत्याद्दक्षिणाग्निमाहरामि॥ ततोऽन्वाधानं॥ व्रतं च॥ तत उत्तरस्यां पौर्णमास्यां शाखा

© Dharmartha Trust J&K. Digitized by eGangotri

५
सन्तोह्
5

तराहरणं॥ त्वशाखायां सोमएव विधानात्॥ तस्यविधिः॥ विहाराडुत्तरतः पूर्वाभिमुखोनूक्तात्विजोब्र
ह्महोत्रध्वर्य्वाग्नीध्रानूक्रमेणोपविश्य [illegible]॥ स्वयमुदङ्मुखोयजमानोवृणीते॥ तत्रप्रयोगः॥ वस्त्रमादाय
अक्षतांपुष्पंश्च त्विजोदक्षिणेजानुन्यादाय अमुकसगोत्र अमुकाख्य अमुकशर्मन्प्रथमजवत्सदक्षिणे
न ऐष्टिकेनवैश्वदेवेनपर्वणाऽहंयक्ष्ये तत्रमेत्वंब्रह्माभव। एवंसर्वेषां। अर्चाकृतवस्त्रादिदानं। पुण्याह
वाचनं॥ आशीर्वादादि॥ ब्रह्मण आसनसंस्कारादि॥ तत आध्वर्यवं यावत्प्रविःसंमर्शनं॥ ततो हविःषु
आसादितेषु व्रतग्रहणे कृते अग्निमंथनं॥ यद्यपि अग्निमंथनीयाख्यासन्नेषुहविःष्विति नियमः॥
तथापि आसन्नानिहवींष्यभिमृश्येत्यनेनत्यवापाहिमांयज्ञहन्मित्यत आरभ्यानुवाकोक्तेनवाक्येनयच्छ
तीत्यंतस्यव्रतग्रहणस्यकर्मणोपेक्षयाहविरासादनस्यपूर्वकालत्वंप्रतिपादितंयाजमानाधिकारे। राम ५

© Dharmartha Trust J&K. Digitized by eGangotri

ततश्चव्रतग्रहणं हविरासादनेनाव्यवहितोऽत्रकालसंबन्धं॥ तस्मात्सत्यपि नियमे हविरासादने व्रतग्र
हणे वक्तृतेऽग्निमंथनं॥ चशब्दाभिप्रायो प्ययमेव सूत्रे॥ ततश्चावर्म्य वेदेः पश्चात्भागे स्थितो ग्रयेम
थ्यमानायानुब्रूहीति संप्रेषितो होता वक्ष्यमाणमन्त्रवचनं गणधर्मेणापठेत्॥ यथा॥ अभित्वा देवस
वितरीशानं वार्याणां॥ सदावन्भागमीमहो३ इति त्रिः अभित्वा॰ हो३ अभि॰ हो३ मही द्यौः पृथिवी चन
इमं यज्ञं मिमिक्षतां॥ पिपृतांनो भरीमभो३ त्वामग्ने पुष्करादध्यथर्वा निरमंथत॥ मूर्ध्नो विश्वस्य वाघ
तो३ तमुत्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः॥ वृत्र हणं पुरंदरो३ तमुत्वा पाथ्यो वृषा समीधे द
स्युहंतमं॥ आरमेत्॥ जाता यानुब्रू ४ ही सुक्रे॥ धनंजयं रणे रणे३ उतब्रुवंतु जंतव उदग्नि वृत्रहा
जनि॥ अत्र विरमेत्॥ हस्तेन धार्यमाणायाँ इति येषां संप्रेषः अस्माकं तु

तुभ्यं हीत्सुनेतो

© Dharmartha Trust J&K. Digitized by eGangotri

हस्तधारणार्थैयं चत्वथीतेनहस्तेनमाथितोग्निर्यदाधार्यन्तेन दिक्षियोज नीयं अवध[illegible]के॥ धनंजयो
रणेरणो३ आपंहस्तेमत्वादिनंशिस्तुंजातंनविभ्रति॥ विरमेत्॥ प्रक्रियमाणायानुब्रू४ हीत्युक्ते वि
श्वामग्निंस्वध्वरो३ प्रदेवंदेववीतयेभरतावस्तुवित्तमं॥ आज्याहुतौहूयमानायां॥ आत्वेयोनोनिषीद
नो३ आजातंजातवेदसिप्रियंशिशीतातिथिं॥ स्योनआगृहपतो३ अग्निनाग्निःसमिध्यतेकविर्गृ
हपतिर्युवा॥ हव्यवाड्जुह्वास्यो३ त्वंह्यग्ने अग्निनाविप्रोविप्रेणसंत्सता॥ सखासख्यासमिध्यसे
३ तंमर्जयंतसुक्रतुंपुरोयावानमाजिषु। स्वेषुक्षयेषुवाजिनो३ इतित्रिः॥ तंमर्जं०नो३ तंमर्जं०नो३
म्॥ इतिपरिधानीया॥ अत्रचविहूरेष्वपिकर्मस्वंतरेणप्रथमांपरिधानीयांचसंतानार्थोधैर्वनका
रुतीतिपरिभाषितत्वादनुवचनेसर्वत्रअग्रर्युवशात्कर्मवैहूर्येतत्संयोगपठितानामृचांपूर्वेमग

© Dharmartha Trust J&K. Digitized by eGangotri

धर्वेनसंघानंकार्यं॥इत्यग्निमंथनं॥ ॥ततएहिहोतरित्युक्ते॥आचम्यतीर्थप्रवेशादि॥कंप्रपद्यादि
सप्तदशसामिधेन्यः॥आवाहनेविशेषः॥अग्निमग्नआवह॥सोममा०॥अग्निमावह।सोममावह॥
सवितारीउपांशुः॥आवहउच्चैः॥सरस्वतीमा०॥इन्द्राग्नीमा०॥मरुतःस्ववसआवह।विश्वान्देवानुप
पा०४ पांशु॥आवाहउच्चैः॥द्यावापृथिवी॥उपांशुआवाहउच्चैः॥अनावाह्य वाजिनोयजतीत्युक्तत्वात्वा
जिनांनावाहनं॥देवांइत्यादि॥सप्तदशेनवज्रेणपाप्मानंभ्रातृव्यमववाधइतिविशेषः॥देवसवित
रेतंत्वाइत्यारभ्यउपवेशनादिसमानं॥नवप्रयाजाः॥चत्वारःप्राकृताः॥चतुर्थोत्तमावंतरेणचत्वा
रआगंतुकाः॥तेच॥भू॰यैं हे॰इडोग्नआज्यस्यव्यंतु४वौ४षट्॥इजः।एवंउषासानक्ताअग्नआज्य
स्यवीतां॥दैव्याहोताराअग्नआज्यस्यवीतां॥तिस्रोदेवीरग्नआज्यस्यव्यंतु॥उत्तमेप्रयाजे॥भू॰ये॰हे

© Dharmartha Trust J&K. Digitized by eGangotri

७ स्वाहाग्निंस्वाहासोमंस्वा हाग्निंस्वाहासोमंस्वाहा॥सवितारं॥उपांशुस्वाहासरस्वतींस्वाहापू
षणंस्वाहामरुतःस्वतवसःस्वाहाविश्वान्देवान्॥उपां०॥स्वाहा॥द्यावापृथिवी॥उपां०॥स्वाहा
देवाआज्यपाजुषाणास्वाहावाजिनेभ्यःअग्नआज्यस्यहविषोव्यन्त्वित्यादि॥सहैतावाज्यभागौ॥अग्न
येत्वनुब्रू४हीत्युक्ते॥त्वमग्नेसप्रथाअसिजुष्टोहोतावरेण्यः॥त्वयायज्ञंवितन्वतोऽम्॥सोमायानु ब्रू४
हीत्युक्ते॥सोमयास्तेमयोभुवऊतयःसंतिदाशुषेताभिर्नोविताभवोऽम्॥प्राकृतेयाज्ये॥प्रधान
स्य॥अग्नयेत्वनुब्रू४ही त्युक्ते॥अग्निर्मूर्धेतिपुरोनुवाक्या॥अग्निंपतैस्तुक्नीभुवोयज्ञस्येतियाज्या॥सो जे२
मायानुब्रू४हीत्युक्ते॥इमंयज्ञमिदंवचोजुजुषाणउपागहि॥सोमत्वंनोवृधेभवोऽम्॥इतिपुरोसो राम
मंयजेत्युक्ते॥यःयेहेसोमंयातेधामानिदिवियापृथिव्यांयापर्वतेष्वोषधीष्वप्सु॥तेभिर्नोविश्वैः ७

© Dharmartha Trust J&K. Digitized by eGangotri

ह्युमना अहेलन्नूर्जंसोम प्रतिहर्या गृभाया ४ वौंषट्। ॐजः इति याज्या। उपांशु सावित्रः सवित्रे। अनु
ब्रू ४ हीत्युक्तो हिरण्यपाणिमूतये सवितारमुपह्वये॥ स चेत्ता देवतापदं। ॐम्। सवितारं॥ यजेत्युक्तो
भू·ये हे·। सवितारमुदीरय कवितमं कवीनामुनत्त्रेनमभिमधाष्टुतेन॥ स नो वसूनि प्रयता हितानि चंद्रा
णि देवः सविता सुवाति। वौ ४ षट्। ॐजः। इति सवितुर्याज्यानुवाक्ये॥ सरस्वत्या अनुब्रू ४ हीत्युक्ते॥ पावका नः
सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसो३म्॥ सरस्वतीं यजेत्युक्ते॥ भू·यें·हे सरस्वतीमिमा त्वद्धा
नानुप्रदानमोभिः प्रतिक्षोमं सरस्वतिञ्जुषस्वा तव शर्मन्नूप्रियतमे दधाना उपस्थेयाम शरणं न वृक्षं ४
वौ ४ षट्। ॐजः। इति सरस्वत्या याज्यानुवाक्ये। इमे उम ४ हीत्युक्तो। शुपंतव व्रते वयं न रिष्येम कदाचन॥ स्तो
तारस्त इह स्मसो३म्। इति पुरो·। पूषणं यजेत्युक्ते। भू·ये·हे पूषणं सुकं तेभ्य अन्यघजतं तेभ्य अन्याह्विषु रूपे अह

© Dharmartha Trust J&K. Digitized by eGangotri

८ नीचैरिवासि। विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु ४ वौ ४ षट् ।। उजं इतियाज्या। मरु
त्वः स्वतवसोउत्तम ४ हीस्तुक्तो ।। इहेहवः स्वतवसः कवयः सूर्यत्वचः ।। यज्ञंमरुतआवृणो शम् । उरो ।।
४ मरुतः स्वतवसोयजेत्युक्तो ।। भू ये हे मरुतः स्वतवसः पवित्रमर्कंगृणतेतुरायमारुतायस्वतवसेभरध्वं ।
येसहांसिसहसासहन्तेरेजतेअग्नेपृथिवीमखेभ्यः ४ वौ ४ षट् ।। उजं । इतियाज्या। वैश्वदेवद्यावापृथिवीयो
वोमांसः। विश्वेभ्योदेवेभ्यः ।। अनुब्रू ४ हीस्तुक्तो। विश्वेदेवासआगतशृणुतामइमंहवं ।। एदंबर्हिर्निषीद
त ।। उं न्नू । उरो ।। विश्वान्देवान् ।। यजेत्युक्तो ।। भू ये हे। विश्वान्देवान्स्तीर्णेबर्हिषिसमिधानेअग्नौसूक्तेन
म[illegible]मसाविवासे। अस्मिन्नोअद्यविदथेयजत्रा विश्वेदेवाहविषिमादयध्वं ।। वौ ४ षट् । उजं । इति या
ज्या। द्यावापृथिवीभ्यां ।। अनुब्रू ४ हीस्तुक्तोमहीद्यौः पृथिवीचनइमंयज्ञंमिमिक्षतां। पिपृतांनोभरीमभिः ।। राम ८

उंभूः३।उरो०।द्यावापृथिवी॥यजेत्पुरो०॥भू०ये०हे।द्यावापृथिवी पृथ्वी वरूले दूरेअंते उपब्रुवे नमसा यज्ञेअ
स्मिन्॥दधाते ये सुभगे सुप्रतूर्ती द्यावारक्षतं पृथिवी नो अभ्वात्॥वौ४षट्॥उअजः।इतियाज्या।विराजो स्वि
ष्टकृतः।यमग्ने स्विष्टकृते तु स्वर्ही त्रके।प्रिश्चो अमेदीदिहि पुरोनो जस्रया सूर्म्या यविष्ठ॥त्वांशश्वंत उ
पयंति वाजो३म्।पुरो०।अग्निं॥स्विष्टकृतं यजेत्पुरो०॥भू०ये०हे अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाधामा
न्ययाट् सोमस्य प्रियाधामान्ययाळग्नेः प्रियाधामान्ययाट् सोमस्य प्रियाधामान्ययाट्।सवितुः॥प्रि
याधामान्ययाट् सरस्व त्याः प्रियाधामान्ययाट् पूष्णः प्रियाधामान्ययाळ्मरुतां स्वतवसां प्रि
याधामान्ययाट्।विश्वेषां देवानां॥प्रियाधामान्ययाट्॥द्यावापृथिव्योः॥प्रियाधामान्ययाइवा
नामाज्यपानां प्रियाधामानि यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं०हविरिमो अग्ने वीतमानि हव्यान न

९ स्तोवह्निर्देवतातिमछ्।प्रतिनईस्वरभीणिब्यंकः४वो४षट्।३।ऊं।इतियाज्या॥उपस्तरण्य।इलोपह्वा
नादिमार्जनांतंप्रकृतिवत्॥वत्सःप्रथमजोदक्षिणा॥यजमानस्यप्रजापतेर्भागइत्यभिमर्शनाभा
१ ष।अन्वाहार्यमभिमृश्येत्युक्तत्वात्॥अध्वर्योरभिमर्शनं भवत्येव॥नत्रोहः॥प्रजापतेर्भागोसीति
मे उदात्तस्या नौ पाहि प्रथमजोगोरस्यूर्जमयिधेहीत्यादि॥दक्षिणासंकल्पः॥अस्यवैश्वदेवपर्वणः
समृध्यर्थंप्रथमजंवत्संदक्षिणांब्रह्मणेहोत्रेध्वर्यवेअग्नीधेचसमविभागेनाहंसंप्रददे॥रुद्राय
त्वेतिप्रतियहमंत्रः॥कोदादित्यनुमंत्रणं॥ततएषातेअग्नइतिसमिधमनुमंत्र्यानवानुयाज्यान्य
जति।तत्रत्रयःप्राकृताः॥प्रथमद्वितीयावंतरापलागंतुकाः।तत्रायंक्रमः॥देवंबर्हिर्वसुव ॰ै॰
नेवसुधेयस्यवेतु॥वौ।देवीर्द्वारोवसुवंतु॥देवीउषासानक्तावसुवीतां।२।देवीजोष्ट्रीवसुवी राम ९
© Dharmartha Trust J&K. Digitized by eGangotri

तां। ४। देवीऊर्जाहुतीवसुवने वसुधेयस्य वीतां। ५। देवादैव्याहोतारावसुवने वसुधेयस्य वीतां। ६। देवीस्तिस्रस्तिस्रोदेवीर्वसुवने वसुधेयस्य व्यंतु।।
७।। देवोनराशंसोवसुवने वसुधेयस्य वेतु।। ८।। स्विष्टकृत्देवोअग्निः स्विष्टकृत्सु वसुवने वसुधेयस्य वीही ४ वौ ४ षट्।। ९ नः। एवं सर्वत्र।।
१।। येयजामहेतु न भवति।। अनुयाजेष्वतुयेयजामहेनास्तीतिवचनात्।। उदकोपः।। सूक्तवाके।।
सूक्तवाकायसूक्ताब्रूहीत्युक्ते। इदंद्यावापृथिवीत्यादि।। अग्निरिदं हविरजुषत।। सोमो हविरजुषत। अग्नि
र्हविरजुषत।। सोमो हविरजुषत। सविता। हविरजुषत।। सरस्वती हविरजुषत।। पूषा हविरजुषत।। मरुतः स्वतवसो
हविरजुषंतावीवृधंतमहोज्यायोक्रत।। विश्वेदेवाः।। हविरजुषत।। द्यावापृथिवी।। हविरजुषेतामवीवृधे
तांमहोज्यायोक्रातां।। देवाआज्यपा अजुषत। अग्निर्होत्रेणाजुषत। वाजिनोदेवाहविर्जोषयिष्यंते वर्धयि
ष्यंतेमहोज्यायः करिष्यंते।। इतिशंयोर्वाकादर्वाजिनयागपक्षे।। उपावेतशंयोर्वाकान्नदावाजिनो।

वी

क्रा २

© Dharmartha Trust J&K. Digitized by eGangotri

१०

10

देवाहविरस्त्ववषंमावीघृधंतमहोज्यायोकतेति। विकल्पस्तुगुराशंयोवीकाहूर्ध्वंवाऽनावात्यवाजिनोयजती
तिसूत्रात्॥ अस्माहृधश्रोत्रायामित्यादिशंयोर्वीकांतंसमानं॥ ततोवाजिनयागः॥ वाजिभ्योत्तु४हीत्वक्रे
।शंनोभवंतुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः॥ जंभयंतोहिंकंरक्षांसिसनेम्यस्मयुयवंनमीवो३
म्॥ इतिद्युरो०। वाजिनोयनेत्युक्तो॥ ऊर्ध्वजानुःपादतलाधारेभूत्वाऽनवानंयजति॥ अर्धर्चावसानमक्तु
त्वेत्यर्थः॥ यथा॥ भूःयेहेवाजिनोवाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाःअस्यमध्वःपि
वतमादयध्वंतृप्तायातपथिभिर्देवयानै४वौषट्॥ ३जःततोयथाहृवेषुपविश्य। भूर्भुवः। वाजि
दे नस्याग्नेवीही४वौ४षट्॥ ३जः॥ येयजामहेनभवति॥ अत्रवौषट्कारेवेतिसूत्रा।ाह्॥ उदकोयः राम
अनुवषट्कारस्यास्विष्टकृत्स्थानापन्नत्वात्स्विष्टकृतश्चाथोरुद्वैवैस्विष्टकृदितिन्हेनार्थवादा १०

ए१

© Dharmartha Trust J&K. Digitized by eGangotri

स्य तरौद्रंत्वग्राहसमित्यग्नीध्रः॥उपहवपूर्वकंवाजिनभक्षःकथ्यते।तत्रप्रथमंपश्चाद्ब्रह्मयजमानःय
था।वाजिनंदेवताकंवाजिद्रव्यंब्रह्माऋत्विग्यजमानोहस्तेगृहीत्वाब्रह्मंउपह्वयस्वहोतरुपह्वय
स्व॥अध्वर्यउप॥अग्नीदुप॥इत्युपहूयसर्वैःप्रत्येकमुपहूतउपहूतइत्यनुज्ञातः॥यन्मेरेतःप्रधावतिय
द्वासिक्तंप्रजायते॥राज्ञासोमेननहूयमस्मात्तुधारयामसिवाजोसिवाजिनमसिवाजोमपिबे
तो हि इतिवाजिनभक्षमंत्रंसर्वेषांहूकशाखिनामित्यनेनभक्षयेत्॥ततोब्रह्मायजमानोपह्वय
स्व॥होतरुप॥अध्वर्यउप॥आग्नीदुप॥यजमानोपह्वयस्वेतिपृष्ट्वातैरुपहूतउपहूतइत्यनुज्ञा
तःसमंत्रकंभक्षयेत्॥एवंहोतायजमानंब्रह्माणमध्वर्युमाग्नीध्रंयजमानंचपृष्ट्वापूर्ववद्भक्ष
येत्॥ततोध्वर्युर्यजमानंब्रह्माणंहोतारमाग्नीध्रंयजमानंचपृष्ट्वात्वशाखोक्तमंत्रपूर्वंभक्षये के

© Dharmartha Trust J&K. Digitized by eGangotri

११ न्॥ ततोग्नीयजमानं ब्रह्माणंहोतारमध्वर्युंयजमानंचपृष्ट्वास्वमंत्रपूर्वकंभक्षयेत्॥ ततोयजमानो
ब्रह्माणंहोतारमध्वर्युमग्नीध्रंचपृष्ट्वापूर्ववद्भक्षयेदिति॥ तथाचसूत्रं॥ यजमानोब्रह्माहोताध्वर्युराग्नी
ध्रश्चसमुपहूयभक्षयंतिप्रथमोजघन्यश्चयजमानइति॥ ततःपत्नीसंयाजादिन्याहवनीयोपस्था
नांतंप्रकृतिवत्॥ अथयागायजमानस्य॥ अग्निमंथने॥ अग्निनाग्निःसमिध्यतइत्याहुतिहोमे
उद्दिमग्निभ्यां॥ प्रयाजेषु॥ इदंसमिद्भ्यइत्यादिवत्तुर्षुप्रकृतिवत्। यथाइदंसमिद्भ्योनममा। ए
कोममएकातस्ययोस्मान्द्वेष्टियंचवयंद्विष्मःत्वंविषिमान्भूयासं।१। इदंतनूनपाते। इदंनराशंसाय
वा॥ द्वौममद्वेतस्ययोस्मान्द्वेष्टि॥ अपविर्तिमान्भूयासं।२। इदमिड्भ्यः। त्रयोममतिस्रस्तस्य
योस्मान्... स्तस्ययोस्मान्ब्रह्मसब्रर्वसीभूयासं॥ पंचमादौइदंबर्हिर्भ्यः यंचममनतस्येत्यादिश्च
द्वेष्टि॰ द्विष्मः यश्मास्वी भूयासं। इदंबर्हिर्षे। चत्वारोममचतस्त्र १ नूनपा
यो रामपा १ ११

© Dharmartha Trust J&K. Digitized by eGangotri

ज्ञाहोभूयासं।५।इदमुषासानक्ताभ्यां।पंचममेत्यादि।इदंदैव्याभ्यांहोतृभ्यां।।पंचममेत्यादि।७
इदंतिसृभ्योदेवीभ्यः।पंचममेत्यादि।८।उत्तमेप्रयाजे।।इदमग्नयेसोमायाग्नयेसोमायसवित्रे
६ सरस्वत्यैपूष्णे मरुद्भ्यःस्वतवेभ्योविश्वेभ्योदेवेभ्योद्यावापृथिवीभ्यांदेवेभ्यआज्यपेभ्योवाजि
भ्यः।पंचममेत्यादि।।९।।आज्यभागयोःपूर्ववत्।।प्रधानस्य।।इदमग्नये।।इदंसोमाय।।इदं
सवित्रे।इदंसरस्वत्यै।इदंपूष्णे।।इदंमरुद्भ्यःस्वतवद्भ्यः।।इदंविश्वेभ्योदेवेभ्यः।इदंद्यावापृ
थिवीभ्यां।।इदमग्नयेस्विष्टकृते।।इतिस्विष्टकृतः।।अनुयाजेषु।।इदंदेवायबर्हिषेनमम
।।इदंदेवीभ्योद्वार्भ्यः।इदंदेवीभ्यामुषासानक्ताभ्यां।।इदंदेवीभ्यांजोष्ट्रीभ्यां।।इदंदेवीभ्यामू
र्जाहुतीभ्यां।।इदंदेवीभ्यांदैव्याभ्यांहोतृभ्यां।।इदंदेवीभ्यस्तिसृभ्यस्तिसृभ्योदेवीभ्यः।।इदं

© Dharmartha Trust J&K. Digitized by eGangotri

१२ देवायनराशंसाय॥इदंदेवायाग्नयेस्विष्टकृते॥सूहने॥अग्निःसोमस्यसवितुःसरस्वत्याःपूष्णो
मरुतांस्वतवसांविश्वेषांदेवानांद्यावापृथिव्योरुज्जितिमनूज्जेषमित्यादि।अग्निःसोमःसवितासरस्व
तीपूषामरुतःस्वतवसोविश्वेदेवाद्यावापृथिवीतमपनुदंतुयोस्मान्द्वेष्टिइत्यादि॥सूक्तवाके॥इ
दमग्नयइत्याद्यान्नमप्रयाजवत्।देवेभ्यआज्यपेभ्योग्नयेहोत्रायवाजिभ्यइतिविशेषः।वाजि
षु।इदंवाजिभ्यः।इदमग्नयेस्विष्टकृते।दिआधारणे।इदंदिग्भ्यः॥इदंप्रदिग्भ्यः।इदमादिग्भ्यः॥
इदंविदिग्भ्यः।इदमुद्दिग्भ्यः।यजमानस्यसदसिसन्मेभूयाइत्यादिभागप्राशनांतंप्रकृतिवत्॥
ब्रह्मकर्मप्रकृतिवत्॥यजमानस्यभागप्राशनांतेवपनं॥अध्वर्युशाखोत्रांसकलं॥स्रुचिस्नाने॥
ब्राह्मणंतर्पयितवैइतिब्रूयात्॥अस्यवैश्वदेवस्यपर्वणःसमृध्यर्थंयथासंपन्नेनतत्प्रिपर्यंतेनभो राम १२

इदं दिग्भ्यः।२

© Dharmartha Trust J&K. Digitized by eGangotri

उतनेनब्राह्मणमेकमहंतर्पयिष्ये।भगवन्तःकर्मांगदेवताःप्रीयंतां॥पश्चाच्छतब्राह्मणभोजनसंक
ल्पः॥चातुर्मास्येषुचत्वारीतिवचनात्॥पर्वचतुष्टयस्यचातुर्मास्यशब्दवाच्यत्वात्प्रतिपर्वविभा
गशःज्ञातंसंपद्यते।अस्यवैश्वदेवस्यपर्वणःसमृद्ध्यर्थंयथासंपन्नेनान्नेनतत्प्रियपर्यंतेनभोजनेन
शतंब्राह्मणाणानहंतर्पयिष्ये॥सहैषएत्यादि।त्रयोवैयज्ञेकामाः॥पुनःपृच्छा॥आशीर्वचनमक्षता
य दानं॥भूयसीद्द्यात्॥यजमानपत्न्योःपरिधेयवस्त्राणांउत्तरपर्वार्थंरक्षणं॥अथांतरालव्रतानि॥
विधिप्राप्तस्यापिमांसस्यानशनं॥सर्वकालेषुस्वदारानभिगमनं॥ऋतुत्रयं स्रवेत्तत्रातुकाले
सजातीयांजायांगच्छेत्॥प्राक्शिरसोभूमिशयनं।उपस्तीर्णमनुपस्तीर्णंवायत्रवाततोनांतरा
यायात्काष्ठासनेवाधःशयनमितितैत्तिरीयाः॥आसनमप्यधएव॥आसनशयनयोःकात्या

© Dharmartha Trust J&K. Digitized by eGangotri

१३ यनेसाहवयीत्॥ सत्यवदनं॥ आहिताग्नेर्यावज्जीवंसत्यवदनेप्राप्तेपिन्ननमेष्ठुक्रमन्नृतंहिन
13 स्तिनस्त्रीषुराजंन्नविवाहकाले॥ प्राणात्ययेसर्वधनापहारेपंचान्ततान्याहुरपातकानीत्येतत्प
श्रुतियद्विहितमसत्यंतदुष्पनेनाधानवत्प्रतिषिध्यते॥ इतिचा[?]तुर्मास्यपरिसमाप्तिपर्यंतंप
ले र्वचतुष्टयांतरालेव्रतान्यवश्यकर्तव्यानि।अकरणेप्रातयनीष्टिःप्रायश्चित्तं॥व्रतशब्दश्रवणात्
अवभृथपर्यंतमुदकंनप्रविशेत्॥ मधुमिश्रमन्नंभक्षयेत्॥ ततःपर्वणिसमाप्तेअग्निविहारःपूर्ववत्
पौर्णमासंकर्म॥ इतिवैश्वदेवंपर्वसमाप्तं॥ अथपर्वचतुष्टयात्मकेषुचातुर्मास्येषुवरुणप्रघासा
ख्यंद्वितीयंपर्वोच्यते॥ तेवरुणप्रघासाःफाल्गुनीप्रयोगस्ययजमानस्यआषाढ्यांभवंति॥ चैत्री
प्रारंभस्यचश्रावण्यांभवंति॥ यद्यपिचतुर्षुमासेषुभवानिचातुर्मास्यानीतिश्रुतकान्वर्थसंज्ञ राम १३

चतुर्षु

© Dharmartha Trust J&K. Digitized by eGangotri

यावच्चतुर्थे मास्येव पर्वान्तरं प्राप्नोति तथापि चैत्रवैशाखयोरधिमासत्वे चतुष्टसंख्याकरणत्वेन यदि
वरुणप्रघासानां प्रयोगः कर्त्तव्यस्तर्हि फाल्गुनीप्रयोगस्य ज्यैष्ठ्यां स्याच्चैत्रीप्रयोगस्य चाषाढ्यां । किं
च ॥ ज्येष्ठस्याधिकत्वे द्वितीयज्येष्ठ्यामाषाढ्यां वा स्यात्तन्माभूदिति फाल्गुनीप्रयोगस्याषाढ्यां चैत्रीप्र
योगस्य श्रावण्यामिति कालनियमः सूत्रकारेण कृतः ॥ आषाढश्रावणयोरधिमासत्वे तु यथा प्रयो
गं प्रथमे पर्वण्यनुष्ठेयं ॥ अस्ति त्रयोदशो मास उपवद्धोऽविज्ञात इत्यधिकमासस्य श्रुत्योपचारात्
प्रथमं वा नियम्येतेति न्यायाच्च ॥ यत्तु ॥ मलमासे चातुर्मास्यानां सर्वदैव निषेध उक्तः पूर्वमासस्यास्तु
त्वमनुत्तरस्य दैवकर्मार्हत्वमिति च ॥ तत्सर्वं प्रथमपर्वारंभपरमिति ज्ञेयं ॥ ननु चतुर्षु चातुर्मास्यानीति
श्रुत्यैव तत्र चतुष्ट्वरक्षा पूर्वमेव दूरीकृता ॥ शुद्धमासे त्वनुष्ठानावकाशोप्यस्त्येव । [illegible] । किमित्येवं नि
यमः क्रियते ॥ शृणु ॥ आरब्धानां चातुर्मास्यानामुत्तरपर्वण्यनुष्ठानयोग्यतायां द्वयोरपि शुद्धाशुद्ध

© Dharmartha Trust J&K. Digitized by eGangotri

२४

14

योर्मासयोः समत्वमेव। तथा च प्रथमं वा नियम्यत इति न्यायस्य परिपुष्टत्वे प्रथमारंभे एवानुष्ठानं युक्तं॥
प्रारंभपर्वोक्तो निषेधो यदि मलस्योत्तरपर्वस्वनुषज्येत तर्हि चातुर्मास्यप्रारंभे गुरुशुक्रयोरस्ते यो निषे
धउक्तः स प्रथमप्रयोगे उत्तरपर्वस्वप्यनुषज्येत॥ तथा चोत्तरकाले अनुष्ठानयोग्यताया अभावात् उ
त्तरपर्वणामननुष्ठानमेव स्यात्। तस्मादारंभोक्तः कालविधिनिषेधास्तत्रैव भवंतीत्यध्यवसीयते॥ त
स्मात्साधूक्तं सूत्रकारेण याज्ञीवरुणप्रघासाइत्यादि। तथा चायमेव निर्णयः कार्त्तिक्यांसाकमेधाः फा
ल्गुनीप्रयोगस्या ग्रहायण्यां चैत्रीप्रयोगस्येत्यत्रापि प्रसरिष्यति॥ समन्यायत्वादिति। अथ प्रारब्धे
षु प्रतिपर्वसु वरुणप्रघासादावंतराले सूतकमृतकोत्पत्तौ कथमिति चेत्॥ साधु॥ श्रौतकर्मणां नि
त्यानां सुयात्रानां करणे यजमानस्य शुद्धिरेव॥ नित्यानामलोपार्थं॥ तदाह पारस्करः॥ नित्यानि निव
र्त्तेरन्वैतानवर्जं शालाग्नौ चैके अन्य एतानि कुर्युरिति॥ अत्र वितानो ग्नीनां विस्तारस्तेनाग्निः॥ तत्र कि

राम
२४

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र

यमाणानि नित्याग्निहोत्रहोमदर्शपूर्णमासाग्रयण चातुर्मास्यनिरूढपशुप्रतिवर्षसंतसोमयागादि

कानि नित्योपात्तानि मनुष्रणीतानि॥ ततश्चाग्रयणसोमयोर्वसन्तकालसाध्यत्वाद्दाशौचांतःसंभाव्य

श्री ते पि परं त्वग्निहोत्रहोमदर्शपूर्णमासप्रतिपर्वचातुर्मास्यानां नियतकालत्वाद्दाशौचेपि क्रियानि

श्चयः॥ उक्तंच्यापि॥ संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्॥ न त्यजेत्सूतके वापि त्यजन्गच्छेद

धो द्विज इति॥ इष्टिशब्दो वा त्वपूत्या दर्शपूर्णमासयोः॥ लक्षणया च नित्योपात्तेषु चातुर्मास्यपशुर्व

स्मा धादिषु॥ कात्यायनोपि॥ वैतानिकं तु स्वयं कुर्यात् शालाग्नौ चैक इति॥ नित्योपात्तमित्यर्थः॥ जाबालि

रपि॥ जन्महानौ वितानस्य कर्मत्यागो न विद्यते॥ शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैरिति॥

वितानस्य पूर्वांक्रस्येत्यर्थः॥ तस्मात्सूतकमृतकेपि प्रारब्धचातुर्मास्यादिषु वरुणप्रघासादिकम

नुष्ठेयमेव॥ एवं दर्शपूर्णमासवरुणप्रघासादौ रजोदोषवत्यां पत्न्यां क्रिया न बाध्यते॥ तत्साध्यानि च

© Dharmartha Trust J&K. Digitized by eGangotri

15

कर्माणि प्राप्तिनिषिद्धं कार्यादित्यविरुद्धं॥ पत्नीपदार्थानां कात्यायनवशतो वर्त्तनमिति प्रायशो
स्माकमनाग्रहः॥ वैश्वानरयाज्ञन्यायाः प्रतिपर्वनावृत्तिः शंकनीया॥ चातुर्मास्यारंभसंयोगविधा
नात्॥ पर्वव्रतद्वयस्य च चातुर्मास्यशब्दवाच्यत्वात्॥ नापि नांदीश्राद्धं प्रतिपर्वावर्त्तते। एककर्मा
दिविधानात्॥ तदुक्तं ग्रंथकारिकायां॥ संस्काराणां तु सर्वेषामारंभे श्राद्धमिष्यते॥ अग्निष्वात्तु पि
त्र्येष्टाक्षे वैदिकं नारभेत्स्मृतेरिति॥ तथा च॥ आग्रयणस्य लक्षणसंस्कारे चितयस्येव संस्कारत्वे एक
मेव श्राद्धं आद्यं तत्रैवोक्तं॥ सर्वेष्वाग्रयणेष्वेकं संस्कारो ह्येक एव स इति॥ इयं च शंका प्रथमारंभ ए
व। आवृत्तौ तु वैश्वदेवादावेव न प्राप्नोतीति सर्वमनवद्यं॥ ॥ ४॥ ॥ अथ पूर्वस्यां पौर्णमास्यां उ
त्तरतो विहारं कृत्वा॥ उद्धरणं कुर्यात्॥ तत्रायं प्रयोगः॥ वरणप्रधानसपर्वार्थं गार्हपत्यादाहव
नीयमुद्धरामि॥ गार्हपत्याद्दक्षिणाग्निमाहरामि॥ अग्न्यन्वाधानं॥ व्रतं चेति पूर्ववत्तत उत्तरस्यां

© Dharmartha Trust J&K. Digitized by eGangotri

ऋत्विक्कर्मार्थं दिन वरणं ॥ पूर्ववदुपवेश्यवस्त्रमादाय अङ्गुष्ठं दक्षिणेजान्वुनि निवेश्य ॥
अमुकगोत्र अमुक अमुकशर्मन् गोमिथुन दक्षिणे रेष्टिकैर्वरुण ब्रह्मासेर हं पदेनैत न्नमे त्वंब्रह्मा
भव ॥ एवंसर्वेषां ॥ प्रतिप्रस्थातात्वत्राधिकः । ब्रह्मण आसनसंस्कारादि ॥ यजमानस्य संचरप्रवेशे
प्रवेशनं ॥ ततआध्वर्य्यवं कर्माग्निप्रणायनं यावत् ॥ अग्निप्रणयने ॥ होताआचम्यतीर्थेप्रविश्य आ
हवनीयस्य पश्चादुत्तरत आसने उपविश्य वक्ष्यमाणं करोति ॥ अत्राग्निभ्यां प्रणीयमानाभ्याम
नुब्रूहीति केषांचित्प्रयोगः । कात्यायनानां तु अग्निभ्यां प्रह्रीयमाणाभ्यामनुब्रूहीत्युक्ते ॥ प्रदे
१ सं ३ वं देव्याधियाभरताजातवेदसं ॥ हव्यानोवक्षदानुषो ३ इति त्रिरासीन एवपठित्वोत्तरे ऋचाव
नुगच्छन्पठेत् ॥ अयमुष्यप्रदेवयुर्होतायज्ञायनीयते ॥ रथोनयोरभीवृतो घृणीवां चेतति त्मनो ३
अयमग्निरुरुष्यत्यमृतादिवजन्मनः ॥ अत्राप्यस्येत् ॥ ततआध्वर्य्यवे निहिते सादयमानयोरिध्मयोः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

१६ सहस्रश्चित्सहीयांदेवोजीवातवेकृतो३ इलायास्त्वापदेवयंनाभापृथिव्याअधि॥ जातवेदोनिधीम
ह्यग्नेहव्यायवोढवो३ अग्नेविश्वेभिःस्वनीकदेवैरूर्णावंतंप्रथमःसीदयोनिं॥ कुलायिनंघृतवंतं
16 सवित्रेयज्ञंनययजमानायसाधो३ सीदहोतःस्वउलोकेचिकित्वांत्सादयायज्ञंसुकृतस्य यो
नौ॥ देवावीर्देवान्हविषायजास्यग्नेबृहद्यजमानेवयोधो३ निहोताहोतृषदनेविदानस्त्वेषोदीदिवाँ
असदत्सुदक्षः॥ अदब्धव्रतप्रमतिर्वसिष्ठःसहस्रंभरःशुचिजिह्वोअग्नो३ त्वंदूतस्त्वमुनःपरस्पा
स्त्वंवस्यआवृषभप्रणेता॥ अग्नेतोकस्यनस्तनेतनूनामप्रयुच्छंदीद्यद्बोधिगोपा३ इतित्रिःपरिधा के
नीयांपठित्वानुवचनंसमाप्यदक्षिणाहस्तयत्रोपविश्यप्रथमोन्मातत्रगत्वोपविश्यवाग्यमादे
र्नियमादुत्सृज्यते॥ ततोहविःश्वासादितेषुसत्सुव्रतग्रहणेचक्रते . अग्निमंथनंपूर्ववत्॥ वरुण एम
प्रघासेषुनित्याहवनीयात्पूर्वतोध्वर्योरुत्तरवेदिः॥ ततोदक्षिणतः प्रतिप्रस्थातुर्वेदिः॥ उत्तर १६

© Dharmartha Trust J&K. Digitized by eGangotri

स्यांवेदौसकलंहोतृकर्मभवति॥ ततएतर्हिहोतरित्युक्तेचात्वालोत्करावंतरेणप्रपद्यअग्निभ्यांसमिध्यमा
नाभ्यामनुब्रूहीत्युक्तः॥ वर्हिराक्रमणं॥ कंप्रपद्यादिसप्रदृश्य सामिधेन्यः॥ अंत्येनप्रणवेनअग्नेमहांअ
सीत्यस्यानुसंधानात्सामिधेनीनामाग्नेयत्वात्संनिधानादग्नेमहांअसीत्यादिनायज्ञभीगेनआहव
नीयोग्निःस्तूयते॥ अत्रचआहवनीयोद्वौ॥ तस्माद्द्विवचनेनोहः॥ अग्नीमहांतौस्थोब्राह्मणौभारतौ॥ प्रव
रनामानियथावत्॥ [illegible] प्रवरनामसूनोहइत्यर्थः॥ अतः वा
सिष्ठादीनामग्नेमहांअसीत्यर्थेऽग्नेःपावकस्यसंनिधानात्यजमानोवासिष्ठइतितस्याग्नेरपिवासिष्ठत्वा तद्वत्स्यादि
त्ये न्वासिष्ठादिभिरग्निरेवस्तूयतइके॥ अथयद्यजमानस्यार्षेयमाहुतन्हैवाअनार्षेयस्यदेवाहविरश्नंतीतिश्रुते
स्तथा कुलीनोयंभवतीतिहविरुपादेयमितिदेवानुप्रत्येतुंयजमानस्यार्षेयनामान्येवकीर्त्यंतइत्यपरेइति
चोदनासंदेहात्॥ अथदेवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितोकविशस्तोब्रह्मसंशितोघृताहवनो।

© Dharmartha Trust J&K. Digitized by eGangotri

१७ उएपोयज्ञानांरथ्यावध्वराणामतृतौहोतारौतूर्णीहव्यवाहौ॥ आस्पात्रेजुह्वौदेवानांचमसौदेवपाना
वरांइवाग्नीनेमौदेवान्तुवांपरिभुवोस्थः॥ आवहदेवान्यजमानायेत्यत्रआहवनीयद्वित्वाहूहः। य
थांआवहतंदेवान्यजमानाय॥ अग्निमग्नीआ४वहतं॥ सोमममावहतं॥ अग्निमावहतं॥ सोमममाव
हतं॥ सवितारंउपांशु॥ आवहतं॥ उच्चैःसरस्वतीमाह्वेवेतं॥ पूषणमावहतं॥ इंद्राग्नीआवहतं॥ वरु
णमावहतं॥ मरुतआवहतं॥ कंउपां॥ आवहतं॥ उ॰देवांआज्यपांआवहतं। अग्निंहोत्रायावहतं॥
स्वंमहिमानमावहतं॥ आववहतं॥ जातवेदसोस्तुयजाचयजतं॥ यदात्वमग्नयेसमिध्यमानायेति
संप्रेषस्तदाअग्नेमहांअसीत्यादौनोहः॥ संप्रेषवशवर्त्तित्वात् संप्रेषवशवर्त्तित्वंचब्राह्मणवायेय
जामहोवषट्कारःसंप्रेषाः इत्यादौसूत्रभाष्यकारैःप्रतिपादितं॥ अस्यैवप्रतिष्ठायैःसमदनेशीव राम
त्रैणोतिविशेषः। देवसवितरित्यादिलिंगादायनांतंप्रकृतिवत्॥ नवप्रयाजाः। चत्वारःप्राकृ १७

© Dharmartha Trust J&K. Digitized by eGangotri

ताः॥चतुर्थोन्नमावंतरेणचत्वारआगंतुकाइतिवैश्वदेववत्॥उत्तमेप्रयाजे॥ भू॰ये॰हेस्वाहाग्निंस्वाहा
सोमंस्वाहाग्निंस्वाहासोमंस्वाहा॥सवितारं।स्वाहासरस्वतींस्वाहापूषणंस्वाहेंद्राग्नीस्वाहावरुणंस्वा
हामरुतःस्वाहा।कं।स्वाहादेवाआज्यपाजुषाणास्वाहावाजिनोअग्नआज्यस्यहविषोव्यंतु॥वौष
ट्॥सहुंताबाज्यभागौ॥प्रधानस्यहविषोयोष्मातंपूर्ववत्॥इंद्राग्निभ्यामनुब्रूहीत्युक्तो।इंद्राग्नीअव
सागतमस्मभ्यंचर्षणीसहा।मानोदुःशंसईशतोऽमृ॥इत्यैंद्राग्नस्यपुरो॰॥इंद्राग्नीयजेत्युक्तो।भू॰ये॰
हइंद्राग्नीप्रचर्षणिभ्यःप्तनाहवेषुप्रपृथिव्यारिरिचाथेदिवश्च॥प्रसिंधुभ्यःप्रगिरिभ्योमहि
त्वाप्रेंद्राग्नीविश्वाभुवनात्यन्या॥वौ॰षड्॥उजः।इतियाज्या॥वरुणायानुब्रूहीत्युक्तो॥इमंमेवरु
णश्रुधीहवमद्याचमृलय।त्वामवस्युराचकेऽमृ।इतिपुरो॰।वरुणंयजेत्युक्तो।भू॰ये॰हेवरुणंत
त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥अहेलमानोवरुणेहबोध्युरुशंसमानआ

© Dharmartha Trust J&K. Digitized by eGangotri

१८ पुःप्रमोषी४वौ४षट् । उज । इतियाज्या ॥ मरुत्वतोजुष्व४हीत्युक्तो । मरुतोयद्धवोबलंजनांअचुच्यवीतन ॥
गिरीरचुच्यवीतनोऽरमु । इतिपुरो० ॥ मरुतोयजेत्युक्तो ॥ अ०ये० हेमरुतोमृयमस्मान्नयतवस्योअच्छानिरंह
तिभ्योमरुतोगृणानाः । जुषध्वंनोहव्यदातिंयजत्रावयंस्यामपतयोरयीणां४वौ४षट् ॥ उज । इति
याज्या ॥ कायउपां । अनुब्रूहीत्युक्तो ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् । स
दाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ उरमु । कं । यजेत्युक्तो ॥ अ०ये० हेकांयःप्राणतो
निमिषतोमहित्वैकइद्राजाजगतोबभूव ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषावि
धेम ॥ वौ४षट् । उज । इतियाज्या । अथयत्कायएककपालइत्यत्रब्राह्मणभाष्येकोवैप्रजापतिरि
तिकिंशब्दस्यरूपेकस्मैइत्युद्देशः ॥ अथोस्वत्वस्यैवैतंनामधेयंकामितिप्रश्नेकासुकांनाधित्यस्य राम
उपगत्ययांतस्यरूपमितिकायेत्युद्देशइतिविवेकः ॥ विराजौत्विष्टकृतः ॥ प्रेद्धोऽग्नइतिपुरोनुवाक्या १८

© Dharmartha Trust J&K. Digitized by eGangotri

भूर्ये॰ हे अग्निं स्विष्टकृतमयाडग्निरग्नें प्रिया धा॰ सोमस्य प्रिया॰ अग्नेः प्रिया॰ सोमस्य प्रिया॰ इन्द्र। सवि
तुः। प्रिया॰ सरस्वत्याः प्रिया॰ पूष्णः प्रिया॰ इन्द्राग्न्योः प्रिया॰ वरुणस्य प्रिया॰ मरुतां प्रिया॰ इ॒॥
वास्य। प्रिया॰ देवानामित्यादि॰ हविरिमो अग्ने वीततमानीति याज्या। इलोपह्वानादि मार्जनांतं प्र
कृतिवत्। अत्र शाखियजमानगृहे प्रतिप्रस्थातुरिलाभक्षे विकल्पः। आश्रावणादौ होतु
रध्वर्युणा साकमेव संबंधात्। ततो ऽध्वर्युभक्षेण प्रतिप्रस्थातुरपि भक्षसिद्धिः। तद्धहे कारोत्येव।
ततो ऽध्वर्यवः पवित्रप्रतिपत्तिभागपरिहरणं च कृत्वा संचरेण दक्षिणामानयंति। तत्राध्वर्यो र्द
क्षिणाभिमर्शनं। न यजमानस्य [illegible]न्वाहार्याभावात्। तत्रोहः। प्रजापते भागो ऽस्य ऊर्जस्वंतो ऽप
यस्वंतौ प्राणापानौ मे पा[illegible] तं समानव्यानौ मे पातमुदानव्यानौ मे पातं गावो ऽस्तु ऊर्जं मयि धत्त
मक्षितीस्थो मा मे क्षेषाथाममुत्रामुष्मिंलोक इह च। संकल्प्य। एषामेष्टिकानां वहणप्रकास

© Dharmartha Trust J&K. Digitized by eGangotri

१९ नांसमृध्यर्थं मिथुनौ गावौ दक्षिणां ब्रह्मणे होत्रे ध्वर्यवे प्रतिप्रस्थात्रे अग्नीध्रे च समविभागेनाहं संप्रद
दे। योयो॰ तां मया पिदत्तेति पत्नी। तत्रोप त्वा मन्त्यं वरुणो ददातु सो मृतत्वमशीय। गौर्हीत्र एधि म
यो मत्यं प्रतिगृह्णन्त्विति प्रतिग्रहमन्त्रः। को दात्कस्मा अदात् कामो दात्कामायादात्कामो दाता कामः
प्रतिग्रहीता कामैतत्त इत्यनुमन्त्रणं। अश्मइानामधुमतीर्देवत्रागच्छत प्रदातारमाविशतेति दत्वा
यजमानो जपेत्। ततउल्मुकं समासेक्षते। ब्रह्मन्प्रस्थास्यामः समिधावाधायाग्नीऽग्नीत्संमृड्ढि।
इति प्रैषे ब्रूते देव सवितरिति ब्रह्मणः। एषा ते अग्ने इति होतुः समिधोरनुमन्त्रणं। तत्रोहः। ए
स ते वाग्नी समिधौ ताभ्यां वर्द्धस्वा च प्यायेथां। वर्द्धिषीमहि च वयमित्यादिना समिधमनुमन्त्र
न वानुयाजान्यजन्ति। प्रथमहितीयोनुयालं तरेणेति पूर्ववत्। सत्तावाके सूक्तावाहीं नुके राम
।इदं द्यावापृथिवी इत्यादि। अग्निर्हविरजुषत। सोमो हविरजुषत। अग्निर्हविर० जुषत। सोमो हविर० १९

© Dharmartha Trust J&K. Digitized by eGangotri

षत। सविता।। हविरजुषत। सरस्वती हविरजुषत।। पूषा हविरजुषत।। इंद्राग्नी हविरजुषेतामवी
वृधेतां महो ज्यायोऽक्रातां।। वरुणो हविरजुषत।। मरुतो हविरजुषंतावीवृधंत महो ज्यायोऽक्रत।।
कः ॐ। हविरजुषत।। देवा आज्यपा आज्यमजुषंताक्रत।। अग्निर्होत्रेण हविरजुषत।। वाजिनो दे
वा हविरजोषियिष्यंते वर्द्धयिष्यंते महो ज्यायः करिष्यंते।। अस्यामृधद्धोत्रायामित्यादि शंयोर्वाकां
तं समानं।। ततो वाजिनयागः पूर्वपर्ववत् भक्षांतः।। तत्र यदि कात्यायनानुरोधेन प्रतिप्रस्थातुर्
भेदस्तदाध्वर्युरग्न्यग्नीध्रयोर्मध्ये प्रतिप्रस्थातरुपहूयस्वेति विशेषः।। ततः पत्नीसंयाजोपयोराहवनीयोप घ्रा
स्थानांतं प्रकृतिवत्।। अध्वर्योरेव वेदस्य विमोकः कर्तव्यो न प्रतिप्रस्थातुरपि।। अप्राधान्यात्।।
नन्वप्राधान्येपि समुच्चये को विरोध इति चेत्।। अस्ति विरोधः। वेदोसीत्।। नन्वप्राधान्येपि समु
च्चये को विरोध इति चेत्।। अस्ति विरोधः।। वेदोसीति पत्नीवेदविमोकयजुर्मंत्रे कामायत्वा वेदो

© Dharmartha Trust J&K. Digitized by eGangotri

२० सीतिपरिषेकमंत्रेचमिथुनानर्थवादात्॥अतएवविमोचनाभिषेचनवाचनादिकमप्यध्वर्यो
र्वेदस्यैवभवति॥इतिप्रस्थानुबैदस्यचिंतानुतेषामेव॥अथत्यागाः॥अग्निप्रणयने॥उत्तर
20 वेद्यांहिरण्यंनिधायआहुतिहोमेसिंहीरसीत्यादिभिर्मंत्रैःक्रियमाणेत्यागः॥इतिमंत्रंयथालिं
गं॥इदंसिंह्यै१इदंसिंह्यादित्यवन्यै२इदंसिंह्यैब्रह्मवन्यैक्षत्रवन्यै३इदंसिंह्यैसुप्रजा
वन्यैरायस्पोषवन्यै४इदंसिंह्यै।इतिइदमग्निभ्यामित्यग्निमंथने।इदंमरुद्भ्यइतिकरंभपा
त्रहोमे॥घृतसिक्तंसक्त्वात्मकंहविःकरंभमितिकरंभमन्यइच्छतीत्यत्रभाष्यं॥तस्यदधिसिक्त
स्यदीपपात्राकाराणिपात्राणिकरंभपात्राणितेषांमल्लकस्थापितेनस्रुवेणपत्नीहोमेकर्त्र
व्येइदंमरुद्भ्यइतित्यागइत्यर्थः॥तथाचपंचमेकात्यायनसूत्रेंकरंभपात्राणिकरोतिकरंभपा
त्राणिजुहोतीत्यादि॥ततोमोषूणइंद्राव्रेतियजमानस्यापयाआध्वर्यवोक्ताः।प्रयाजेषु॥अथ राम २०

© Dharmartha Trust J&K. Digitized by eGangotri

स्तुवैश्वदेवपर्ववत्॥ अथोन्नमेप्रयाजे॥ इदमग्नयेसोमायाग्नयेसोमायसवित्रेसरस्वत्यैपू
ष्णइंद्राग्निभ्यांवरुणायमरुद्भ्यःकायदेवेभ्यआज्यपेभ्योवाजिभ्यः॥ प्रधानस्यइदमग्नये॥ इदं
सोमाय॥ इदंसवित्रे। इदंसरस्वत्यै॥ इदंपूष्णे। इदमिंद्राग्निभ्यां॥ इदंवरुणाय॥ इदंमरुद्भ्यः
इदंकाय॥ इदमग्नयेस्विष्टकृते॥ अनुयाजेषुवैश्वदेववत्॥ सूक्ते॥ प्रथमंउत्तरवेदौ॥ तत्र
अग्नेःसोमस्यसवितुःसरस्वत्याःपूष्णइंद्राग्न्योर्वरुणस्यकस्योज्जिति। अग्निःसोमःसविता
सरस्वतीपूषेंद्राग्नीवरुणःकस्तमपनुदंतु। दक्षिणवेदौमरुतामुज्जिति॥ मरुतस्तमप
नुदंतु। सूक्तवाके॥ उन्नमप्रयाजवत्॥ कायदेवेभ्यआज्यपेभ्योऽग्नयेहोत्रायवाजिभ्यइतिवि
शेषः॥ वाजिनस्यभागोवैश्वदेववत्॥ ततःपत्नीसंयाजेभ्यआरभ्यसदक्षिसन्मेभूयादित्यादि
पयोभक्षंप्रजातिकामाइत्यंतंभागमकृत्वर्ज्जितंसकलमपियाजमानंभवति॥ अथप्रस्तरणे

© Dharmartha Trust J&K. Digitized by eGangotri

२१ प्यासमसंस्कारादौ विशेषो लिख्यते॥ पूर्वेद्युः करंभपात्रकरणोत्तरस्मी॥ अपरेहनि॥ वरेणोसमंत्रकः॥ सद्दे
ध्मेनोपवेशनेसमंत्रकः॥ अथब्रह्मचतुरत्रोपरिग्रहोपरिग्रहीष्यावइतिप्रैषे॥ ॐ परिगृह्णीतंइतिप्रसवः।
21 अथब्रह्मन्निधौप्रोक्षिष्यावः ब्रह्मन्बर्हिषीप्रोक्षिष्यावइत्यत्रॐप्रोक्षतंइतिप्रसवः॥ पूर्वादिब्रह्मणोपू
र्वं॥ अथवारुणप्रानिक्षापेणावभृथंकर्तुंसर्वेऋत्विजःसहवरुणालयंव्रजंति॥ तत्रयेथासोमइति
तत्वक्षतित्वेपियावंतोघटमानाधर्मास्तावंतःकल्प्यंते॥ क्षवंब्रुहूमाज्यस्थालींवेदंसमिधोदर्भमु
ष्टिंश्रुतावदानंनिक्षामपात्रंचगृहीत्वापंचप्राकृताऋत्विजोयजमानःपत्नीचयांति॥ नात्रधिष्ण्य
समीकरणं॥ तदभावात्॥ ऋत्विक्तुसत्त्वेपितदीक्षणमपिनिवर्तते॥ अत्रानूबंध्यायामितिवच
नात्॥ उरुंहिराजावरुणश्चकारेत्येतंयजमानःऋत्विजःअनुगच्छन्॥ अत्रापिजपेद्देव॥ ऋत्वि राम
गनुगमनस्यतुल्यत्वात्॥ सामभिधनंतुनभवति॥ सामाभावात्॥ नमोवरुणायाभिष्ठितोवरुण २१

नि

© Dharmartha Trust J&K. Digitized by eGangotri

स्य पाशः इति मंत्रेणाऽवधायेति लिंगभूनिर्द्देशात् सर्वे इत्य नु मन्त्रे द्वयोर्योध्यस्तु यादं मुक्त्वा वाहनीयं
कुर्वंति ब्रह्म होतृ यजमानादयोऽध्वेव तिष्ठंतः ॥ तत्र प्रयाजादिरनुयाजांतेति दशाङ्ग इति पक्षः
प्रथमः । स्विष्टकृदंतावेत्यष्टाङ्ग इति पक्षो द्वितीयः ॥ आज्यभागानुयाजरहितेति षडङ्ग इति पक्षस्तृ
तीयः ॥ तत्र प्रथमस्त्विह कल्प्यते मुख्यत्वात् ॥ तिष्ठंतीति वचनात् देशाप्रक्लृप्तेपि न आसनसंस्का ध्य
रो ब्रह्मणः ॥ होता पूर्वाभिमुखः प्राचीयाणी प्रशस्त्यलक्षणाद्दापनं पठेत् ॥ बर्हिर्वर्जितास्त्वत्रापि प्र
याजाः ॥ उत्तमे प्रयाजे ॥ भूर्भुवः स्वः स्वाहाग्निः स्वाहा सोमः स्वाहा वरुणः स्वाहा देवा इत्यादि ॥ वार्त्रघ्नावाज्य
भागौ ॥ प्रधानस्य ॥ वरुणायानुब्रूहीत्युक्ते । उरुं हि राजा वरुणश्चकार सूर्याय पंथामन्वेतवा उ ।
अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चिदस्य । इति पुरो० । वरुणं यजेत्युक्ते ॥ भूर्भुवः ये
हे वरुण शतं ते राजन्भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे अस्तु । बाधस्व दूरे निर्ऋतिं पराचैः कृ

© Dharmartha Trust J&K. Digitized by eGangotri

२२ तंचिदेनःप्रमुमुग्ध्यस्मार्दू॰वौ४षट्।उजः।इतियाज्या॥सत्वंनोअग्नेवमस्त्वन्नेर्अग्नेवरुणस्येति-
स्विष्टकृतोयाज्यानुवाक्ये॥सोमेउक्तत्वात्॥अग्नीवरुणाभ्याममत्रुत्रू४हीत्युक्तो॥सत्वन्नोअग्नेवमो
भवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणंरराणोवीहिमृलीकंसुहवोनएधोउम्।इति
पुरो०॥अग्नावरुणौयजेत्युक्तो॥भू॰ये॰हेग्नीवरुणौत्वंनोअग्नेवरुणस्यविद्वांदेवस्यहेलोवयासिसी
ष्ठाः।यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मा४द्वौ४षट्।उजः।इतियाज्या॥उदको
पः।स्विष्टकृन्निगदोनभवति॥ननिगदमाहेतिसूत्रात्॥ब्रूयाद्वेतिसूत्रात्पक्षोभवत्यपि॥यदाभ
वतितदाविचारः॥अत्रावभृथ्येष्टौस्विष्टकृद्देवतास्थानेअग्नीवरुणावादिष्टौएवंसतियेयजामहे
ग्नीवरुणाविष्टहोनिर्विवादएवंनिगदस्तत्रब्रूयाद्वेतिवैकल्पिकःसांख्यायनानांह्युयज्ञाचार्यै राम
रुक्तत्वात्पूर्वहोभाष्यकारपद्धतिकारादिभिर्दर्शितः॥यथा॥येयजामहेग्नीवरुणावयाष्टामग्नीव २२

© Dharmartha Trust J&K. Digitized by eGangotri

रुणा[illegible]ग्नेः प्रियाधामान्ययाष्टं सोमस्य प्रियाधामान्ययाष्टं वरुणस्य प्रियाधामान्ययाष्टं देवा
नामाज्यपानां प्रियाधामानि यक्षत् ताम्मानी वरुणयोर्हौत्रोः प्रियाधामानि यक्षत् स्वं महिमानमायज
तामेज्याइ[illegible]षः कृणुतां तावध्वरो जातवेदसो जुषेतां हविस्त्वं नो अग्ने वरुणस्येत्यादि समानं ॥ काण्डरत्न (धा
मालाकारस्तु ऊहश्चिन्त्य इत्याह ॥ तत्र अग्निः स्विष्टकृद्देवानामग्न्यादीनां प्रियाणि धामानि इष्टवान्
॥ अग्निर्होतु स्विष्टकृत आत्मनोपि प्रियाणि धामानि यजतु । स जातवेदा अग्निः स्विष्टकृत् ॥ इति
त स्विष्टकृद्ब्राह्मणशेषपथानुसारेणार्थमन्वानाभाष्यकारादय ऊहमूचुः । स्विष्टकृतोन्योग्निर्दैव्यो
होता देवानामग्न्यादीनां प्रियाणि धामानि इष्टवानित्याद्यर्थमापस्तम्बशाखास्यदर्शपूर्णमास
विधारणपव्याख्यानसंमतं निगदस्य स्वीकुर्वन्न काण्डरत्नमालाकारस्तु ऊहं चिन्त्यमाहेति विवेकः ॥ त
तो वर्हिर्वर्जं द्वावनुयाजौ ॥ इति प्रयाजादिरनुयाजान्तेतिपद्धतिः स्फुचितः ॥ अथ त्यागाः ॥ त्रिषु

© Dharmartha Trust J&K. Digitized by eGangotri

२३ याजेषुप्रकृतिवत्॥ उत्तमेप्रयाजे। इदमग्नयेसोमायवरुणायदेवेभ्यआज्यपेभ्यः॥ आज्यभाग
योः॥ इदमग्नये॥ इदंसोमाय॥ प्रधानस्यइदंवरुणाय। स्विष्टकृतः॥ इदमग्नीवरुणाभ्यां॥ अनुया
जयोः इदंदेवायनराशंसाय। इदंदेवायाग्नयेस्विष्टकृते। ततोऽयेनस्त्रियावकृतंयेनायाम्रशतंस्त्र
री॥ येनाक्षावभ्यषिंचतंयेनेमांपृथिवींमही॥ यद्वांतदश्विनायशस्तेनमाममभिषिंचतमितिहोता
आत्मानमभ्युक्षते॥ निष्कासस्थाल्यापूर्णांअवभृथस्नानंकारयेत्तां॥ ततोजलाशयादुत्तीर्णयो
र्दंपत्योरन्यत्वस्त्रपरिधानं॥ आर्द्रवस्त्राणपक्षर्यवेदयात्॥ एतानिदंपतीवस्त्राणिवार्हस्पत्या
निअध्वर्यवेतुभ्यमहंसंप्रददे॥ पश्चात्रिप्रांतेषुसर्वेषुउपोछिवेनचक्षुषागृहान्यैमिमानुष
इतिआगच्छन्यजमानोजपेत्॥ ततोयजमानोगृहेसमागत्य। इहोसहस्त्रदक्षिणोपिपूषानिषी
दन्तुइतिमंत्रेणोपविशेत्॥ तदनंतरंआगत्यआहवनीयेसमिधौजुहोति। देवानांसमिदसीति एम
मजनं। न्दयभ्यो तिमंत्रेणादंपत्योः स्नानं। नरेनरदछविरोधनं। तावितय २३

© Dharmartha Trust J&K. Digitized by eGangotri

प्रथमां॥ अमंत्रकां द्वितीयां॥ तद्देवपत्नी गार्हपत्ये तूष्णीमेव समिधावादधाति॥ ततो यजमानभागप्राशनं
प ततआहवनीयस्योर्मध्ये स्थित्वा ब्राह्मणो तर्पयितवै इति प्रैषे द्वयोस्तर्पणं॥ अमीषां वरुणप्रघासानां समृ
द्ध्यर्थं यथा संपन्नेनान्नेन ब्राह्मणौ द्वावहं तर्पयिष्ये॥ भगवत्यः० शतब्राह्मणसंकल्पः॥ अमीषां वरुण
प्रघासानां समृद्ध्यर्थं यथा संपन्नेनान्नेन शतं ब्राह्मणान् अहं तर्पयिष्ये॥ भगवत्यः०॥ सहैष यज्ञ उवाच॥
॥ त्रयो वै यज्ञे कामाः॥ पश्चात् वैश्वदेवपर्ववद्वयनं॥ आध्वर्यवोक्तं सकलं॥ ततः स्नातो भूत्वा सतिल
वासः सन् अक्षतान् दत्वा ब्राह्मणान् आशीर्वादयेत्॥ ततः पुनः पृच्छा॥ अद्याद्येत्यादि एवं गुणविशेष
मु णविशिष्टायां पुण्यतिथौ अंष्टितानामेष्टिकानां वरुणप्रघासानां विधेर्यन्न्यूनं यदतिरिक्तं तत्सर्वं
ब्राह्मणानां वचनात् यज्ञपुरुषप्रसादाच्च सर्वं परिपूर्णमस्तु॥ ततो हतानां शिरसा आदाय भूरिदा
नं कुर्यात्॥ ततः पूर्ववत् समारोपः॥ ततः शालायां अरणीं नयेत्॥ मंथनं कृत्वा अग्नीन्विहृत्य सौरी

© Dharmartha Trust J&K. Digitized by eGangotri

२४ मासंकुर्यात्॥ ततो ब्राह्मणान् भोजयित्वा भुंजीत॥ वरुणप्रघासाः समाप्ताः॥ गुरुनाथेभ्यो नमः॥ श्रीशारदायै नमः॥ ॥अथ साकमेधाख्यं तृतीयं पर्वोच्यते॥ ते साकमेधाः फाल्गुनीप्रयोगस्य यजमानस्य कार्त्तिक्यां भवंति॥ चैत्रीप्रयोगस्य आग्रहायण्यां भवंति॥ अग्निरनीकवतीष्टिप्रभृति सकलं कर्म साकमेधशब्दवाच्यं॥ त

व

कृत्वा त्र्यहसाध्यं॥ पूर्वस्यां प्रातरुत्थाय नित्यहोमं उद्धरणं कुर्यात्॥ तत्र प्रयोगः॥ अनीकवतीष्ट्यर्थं गार्हपत्यादाहवनीयमुद्धरामि॥ अनीकवतीष्ट्यर्थं गार्हपत्याद्दक्षिणाग्निमाहरामि॥ अथ अन्वाधानं॥ ब्रह्मवरणं॥ अमुवासगोत्र अमुकशर्मन् अन्वाहार्यदक्षिणया अनीकवतीष्ट्याहं यक्ष्ये तत्र मे त्वं ब्रह्मा भव॥ इत्यादि ब्रह्मण आसनसंस्कारांतं॥ अत्राद्यर्थं वैकर्मणि जाते व्रतग्रहणे कृते एहि होतरित्युक्ते संचरेऽपपठ्य वर्हि राजन्यकं चप्रघादि सप्तदश सामिधेन्यः॥ आवाहने॥ अग्निमग्न आवह॥ सोममावह॥ अग्निमनीकवंतमावह॥ देवां इत्यादि॥ अस्येप्रतिष्ठायै इत्यादि स्तुर्गदापनांतं प्रयाजाः प्रकृतिवत्॥ उत्तमे प्रया राम

२४

जे॥ स्वाहाग्निं स्वाहा॥ सोमं स्वाहा॥ अग्निमनीकवंतं स्वाहा॥ देवा इत्यादि॥ वार्त्रघ्नावाज्यभागौ॥ प्रधानस्य॥
अग्नयेनीकवतेनुब्रूहीत्युक्ते॥ अनीकैर्द्वेषो र्दयाग्ने विश्वाभिरूतिभिः॥ रयिन्नो देहिजीवसो इत्यु॥
इति कल्यजापुरो॰॥ अग्निमनीकवंतं यजेत्युक्ते॥ ये॰ हे अग्निमनीकवंतं सेनानीकेन सुविदत्रो अ
स्मे यष्टा देवां आयजिष्ठः स्वस्ति॥ अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि॥ वौ॥ षट्॥ इं
ज॰। इति याज्या॥ नित्ये स्विष्टकृतः॥ ये॰ हे अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया॰ सोमस्य प्रिया॰ ल
ग्नेरनीकवतः प्रिया॰ देवानामित्यादि॥ इळोपह्वानादिमार्जनांतं॥ अन्वाहार्यो दक्षिणा॥ अभि
मृश्य॥ अस्या अनीकवत्या इष्टेः समृध्यर्थं अन्वाहार्यं दक्षिणां ब्रह्मादिभ्यो हं संप्रददे॥ प्रतियह्वादि
ग्रहणादिवत्॥ एषा ते अग्ने॥ अनुयाज्याः॥ सूक्तवाके॥ इदं द्यावापृथिवी इत्यादि। अग्निर्हविरकृत
सोमो हविरकृत॥ अग्निरनीकवान् हविरकृत। देवा इत्यादि॥ पत्नीसंयाजादि सर्वं समानं॥ अ

© Dharmartha Trust J&K. Digitized by eGangotri

२५

थत्यागाः॥उत्तमेप्रयाजे॥इदमग्नयेसोमायाग्नयेनीकवतेदेवेभ्यआज्यपेभ्यः॥आज्यभागयोः
पर्वणोरेकवस्त्रता ॥ अहतवासाः पत्नी च ते एव वरुणप्रघासेष्वपीति कात्यायनसूत्रात् ॥ अहते वाससी
परिधानीयं उत्तरीयं च यस्य सोऽहतवासाः एवं पत्न्यपीत्यर्थः ॥ प्रतिपर्वैकाशतब्राह्मणसंकल्पः ॥ पौर्णि
नि मास्यां समाप्य उत्तरत्रयागार्थं स्रुद्धरणं ॥ अग्न्यन्वाधानं ॥ पश्चात्व्रतं ॥ अन्यत्सर्वं समानं ॥ इति पांचाहि
केषु विशेष उक्तः ॥ अथैकाहिकान्यपि चातुर्मास्यानि त्यो यत्तत्त्वे न कथंचित्समयसंकुचितत्व
त्वात् अनुष्ठेयानि अन्यतरस्मिन् पर्वकाले ॥ अधिकतंत्रप्रक्रमानावृत्त्या यथा पर्वसकालप्रधानानि
इति तेषां लक्षणं ॥ एतदेवाथवाप्येकपर्वण्येकपशौ चेति शांखायनसूत्रे द्वैविध्यमुक्तं ऐष्टिका
नि यासुकानीति ॥ तत्रेदानीमैष्टिकप्रसंगादैष्टिकानि निरूप्यंते ॥ तत्र पर्ववत्तुष्टयस्य भिन्नकाल
साध्यस्य किंचिद्भेदाभिन्नस्य संकोच्यवृत्त्या एककालसाध्यत्वं तंत्रेणायद्भवति तत्तांत्रिकं लक्षणं ॥

© Dharmartha Trust J&K. Digitized by eGangotri

किंचिद्भेदभिन्नत्वात्तंत्राणां किमत्र तंत्रमादरणीयमिति ॥ उच्यते ॥ लघुमहतोर्महतः प्राबल्यादिति
न्यायेन यन्महत्तंत्रं तत्समुदायि भवति ॥ तच्च वारुणप्रघासिकं ॥ तेनैवाध्वर्यवोपि समारभंते ॥ अन्यो
वैशेषिको धर्मस्तत्रतत्रोच्यते ॥ अथ पद्धतिः ॥ अन्यतरस्मिन् काले पूर्वस्यां पौर्णमास्यां वैश्वानरपा
र्जन्याइष्टिर्भवति ॥ प्राचो[illegible]द्धरणाद्या आग्रयणांतर्प्पणपर्यंता कल्पिता ॥ ऐकाहिकानां प्रथमप्रयो
गासंभाव्यत्वान्नांदीमुखश्राद्धसंभावनापि न भवति ॥ ततः पूर्वस्यामेव पौर्णमास्यामुद्धरणं ॥ अग्न्य
न्वाधानं वरणं च ॥ नन्वेतत्प्रारंभे वैश्वानरपार्जन्या सद्यःकाला इष्टिर्भवतीति पद्धतिकाराः ॥ सद्यः
कालां निरूप्येष्टिमिति भारतवचनात्सद्यःकालत्वं प्रतीयते ॥ तथा च उत्तरस्यामेव वैश्वानरपर्जे
न्यादि सर्वं प्राप्नोति ॥ तत्किमिति ॥ सत्यं ॥ येषां पूर्वस्यां पौर्णमास्यां प्रधानानुष्ठानं तेषांत्काल
मिष्ट्यादि वक्तुं युक्तं ॥ परंत्वस्माकं पर्वण्येवारंभस्तेषां न युज्यते वक्तुं ॥ अस्माकं तु पर्वणि दर्शपूर्ण

© Dharmartha Trust J&K. Digitized by eGangotri

मासयागार्थमुद्धरणादिप्रसङ्गमेव ॥ उत्तरत्र विशेषानुष्ठानप्राप्तौ दर्शाद्यर्थोद्धरणाद्यकरणे तदना
रंभे च व्रतादिशून्यमेवाहः स्यात् ॥ तदनर्थकारीति नन्याय्यं ॥ तस्मादुक्तासंभवे सति सद्यःकाल
त्वं युज्यते ॥ किं च तदप्यन्येषां ॥ अस्माकं तु अग्नीनन्वादधातीष्टिपक्षे वं धेनुश्वैद्यरिति नियमादि
तिथ्यार्वधितं प्रसरणं ॥ नन्वैकाहिकत्वमेकाहःसाध्यत्वमिति चेत् ॥ न ॥ नानातंत्राणां पर्वणां एक
तमाधिकतंत्रसाध्यत्वेपि निरूढं ॥ तदुक्तलक्षणं च युक्तं ॥ तस्मात्पूर्वस्यां पौर्णमास्यां वैश्वानरपार्जन्या
दिष्वग्न्यन्वाधानां तं कर्तुं युक्तमेव ॥ कारंभपात्राद्याधर्यं वं तद्दशात् भवति ॥ येषां तु पूर्वस्यां पौर्णमा
स्यां प्रधानानुष्ठानं तेषां सद्यःकालत्वमेव युज्यते ॥ पूर्वस्याह्नः शून्यत्वाभावात् ॥ अथ प्रक्रांते उद्धर
णप्रयोगः ॥ ऐष्टिकैकाहिकचातुर्मास्यार्थं गार्हपत्यादाहवनीयमुद्धरामि ॥ ऐष्टिकैकाहिकचातुर्मा
स्यार्थं गार्हपत्याद्दक्षिणाग्निमाहरामि ॥ अग्न्यन्वाधानं सकलं ॥ अनुविस्तरणं । प्राङ्गारवानुपवेशपउ

© Dharmartha Trust J&K. Digitized by eGangotri

५९ दक्षिणतोयजमानः अमुकगोत्रः अमुकाऽमुकशर्मन् प्रथमजवत्समिथुनगावर्षभश्वेताश्वदक्षि

णो रैहिकैरैकाहिकैश्चातुर्मास्यैरहं यक्ष्ये तत्र मे त्वं ब्रह्मा भव ॥ एवं सर्वेषां ॥ ब्राह्मणआसनसंस्कारः

५९ समंत्रकोयजमानस्य दक्षिणतः । सहैधमेनोपवेशनेन च ॥ होता आचम्यौंआवनीयस्य पश्चादुत्तरत ६

उपविशेत् ॥ अग्निर्मांप्रद्धीयमाणाभ्यामित्युक्तः ॥ प्रदेवं देव्याधिया३ आसीनः प्रथमास्तुन्नेरेक्ष

नुसंयन्‌इलायाह्वान् । साध्यमानयोरिध्मयोरग्ने विश्वेभिः स्वनीक १ सीदहोतः १ निहोता १ त्वं दूतः

१ परिधानीया ॥ यत्रचासीनः प्रथमामन्वयोचत्रास्थित्वोत्सृज्यते ॥ तदनंतरमासन्नेषु हविःषु

व्रतग्रहणेचकृते अग्निर्मंथनं ॥ आचम्य संचरेप्रविश्य पश्चाद्वेदेरवस्थानं कुर्यात् । अग्नयेमथ्य

मानायानुब्रूहीत्युक्तः ॥ अभित्वादेवसवितः १ त्रिःप्रथमां । महीद्यौः १ त्वामग्नेपुष्करादिति च ३ एक्ष

उतब्रुवंतुजंतवइतिजाताय १ आयंहस्तेनखादिनमितिहस्तेनधार्यमाणाय १ उन्नेरप्रद्धियमाणा ५६

© Dharmartha Trust J&K. Digitized by eGangotri

यस्र् अग्निनाग्निः समिध्यते ॥ त्वं त्वग्ने अग्निना ॥ तं मर्जयंतेत्यग्निमंथनीयाः ॥ ततएहिहोतरित्युक्त्वा
वात्वा लोकाः एवं तरेण प्रविश्य बर्हिराक्रम्य अग्निभ्यां समिध्यमानाभ्यामनुब्रूहीत्युक्ते ॥ ब्रह्मन्नमि
मि॰ ॥ अनुब्रूहीत्युक्ते ॥ कं प्रपद्यादि सप्तदश सामिधेन्यः ॥ तूष्णीं ध्रुवं हव्यवाहनो इ अग्नीमहांतो स्वी
ब्राह्मणो भारतो ॥ प्रवरनाम्नामनूहः ॥ देवेध्मोमन्विद्धा हविष्कृतो विश्वानुमदितो कविशस्तो ब्रह्म
संशितो घृताहवनो । प्रणीयो यज्ञानां रथ्याव ध्वराणाममन्त्रौ होतारो तूष्णीं हव्यवाहो ॥ आस्या त्वे
ज्ञुह्वो देवानां चमसो देवपानाव रां इवाग्नी नेमी देवान्सुवां परिभुवो स्थः ॥ आवहतं देवान्यजमा
नाय । अग्निमग्नी आवहतं ॥ सोममावहतं । अग्निमावहतं ॥ सोममावहतं ॥ सवितारं । उ॰ । अवह
तं ॥ सरस्वतीमावहतं ॥ पूषणमावहतं ॥ मरुतः स्वतवस आवहतं ॥ विश्वान्देवान् । उ॰ । आवह
तं ॥ द्यावापृथिवी । उ॰ । आवहतं ॥ इंद्राग्नी आवहतं ॥ वरुणमावहतं ॥ मरुत आवहतं । कं । उ॰ ।

© Dharmartha Trust J&K. Digitized by eGangotri

५० आवहतं॥ अग्निमनीकवंतमावहतं॥ मरुतः सांतपनांआवहतं॥ मरुतो गृहमेधांआवहतं॥ म
रुतो गृहमेधिनआवहतंवा मरुतः क्रीडिनआवहतं॥ अदितिमावहतं॥ महेंद्रमावहतं॥ वि
50 श्वकर्माणं।उ।आवहतं॥ शुनासीरावावहतं। वास्तुं।उ।आवहतं॥ सूर्यं॥ उपांशु॥ आवहतं॥
देवांआज्यपांआवहतं॥ अग्निं होत्रायावहतं॥ स्वंमहिमानमावहतं॥ आचवहतजातवेदसो
स्वयजावयक्षतं॥ यदात्वग्नेयेसमिध्यमानायेतिसंप्रेषस्तदा अग्निमग्नआवहेत्यादिज्ञेयं॥
अस्येप्रतिष्ठायेइत्यादिभूम्यभिमर्शनादिस्रुगादापनांतंसमानं॥ कचावादाप्यनवप्रयाजा
न्यजति॥ चत्वारःप्राकृताः। चतुर्थोन्नमावंतरेण चत्वारआगंतुकाः॥ उत्तमेप्रयाजे॥ स्र्ये·दे
स्वाहाग्निं स्वाहासोमं स्वाहाग्निं स्वाहासोमं स्वाहा॥ सवितारं॥उ·॥ स्वाहा सरस्वतीं स्वाहापूषणं रामः
स्वाहामरुतः स्वतवसः स्वाहा। विश्वान्देवान्॥ उपां·स्वाहा॥ द्यावापृथिवी॥उ·॥ स्वाहेंद्राग्नी स्वा ५०

हावरुणं स्वाहा मरुतः स्वाहा ॥ कं ॥ ॐ ॥ स्वाहाग्निमनीकवंतं स्वाहा मरुतः सांतपनान् स्वाहा मरुतो
गृहमेधान् स्वाहा मरुतो गृहमेधिन इति वा स्वाहा मरुतः क्रीलिनः स्वाहादितिं स्वाहा महेंद्रं स्वाहा
विश्वकर्माणं ॥ ॐ ॥ स्वाहा शुनासीरौ स्वाहा ॥ वायुं ॥ ॐ ॥ स्वाहा ॥ सूर्यं ॥ ॐ ॥ स्वाहा देवा आज्यपा जु
षाणा स्वाहा वाजिनो अग्न आज्यस्य हविषो व्यंतु ४ वौषट् ॥ स हुतावाज्यभागौ ॥ प्रधानहविषां ॥ अ
ग्निर्मूर्द्धा भुवो यज्ञस्येत्यग्नेः ॥ इमं यज्ञं वा ते धामानि दिवीति सोमस्य हिरण्यपाणिमूतय उदीरयक
वितममिति सवितुः ॥ पावका नः सरस्वती मा जुह्वाने ति सरस्वत्याः ॥ पूषं तव व्रते वयं शुक्रं ते अन्य
दिति पोष्णस्य ॥ इहेह वः स्वतवसः प्र वित्रम् अर्कं गृणात इति मरुतां स्वतवसां ॥ विश्वे देवास आगत श्रु
णोव हिं षिसमिधान इति विश्वेषां देवानां ॥ मही द्यौः पृथिवी उर्वी पृथ्वी बहुल इति द्यावापृथिव्योः ।
इंद्राग्नी अवसा प्रचर्षणिभ्य इतींद्राग्न्योः । इमं मे वरुण तत्वा यामीति वरुणस्य । मरुतो यद्ध वो बलं पू

© Dharmartha Trust J&K. Digitized by eGangotri

५१ यमस्मान्नयतवस्योअछेतिमरुतां॥हिरण्यगर्भःसमवर्त्तताग्रेयःप्राणतोनिमिषतोमहित्वेतिकस्य॥अ
51 नीकेर्हैषोर्ह्याग्नेसेनानीकेनेत्यग्नेरनीकवतः॥सांतपनाइदंयोनोमरुतोअभिइतिमरुतांसांतपनानां।
गृहमेधासआगतप्रभुध्यावइतिमरुतांगृहमेधानां॥क्रीलंवःशर्द्धोमारुतंपर्वतस्विदितिमरुतांक्रीलिनां।
उतत्वामदितेमहिमहीसुमातरंइत्यदितेः॥महांइंद्रोयओजसामहांइंद्रोनृवदितिमहेंद्रस्य॥वाचस्प
तिंयातेधामानिपरमाणीतिविश्वकर्मणः॥शुनासीराविमांशुर्जनःघालाइतिशुनासीरयोः॥तववाय सं ५
वृतस्पतेध्यर्यवस्त्वष्टुक्षांसोमक्षूनीतिवायोः॥तरणिर्विश्वदर्शतोदिवोराक्मइतिसूर्यस्य॥विराजोस्वि
ष्टकृतः॥त्रिष्टोअग्नइतिपुरोनुवाक्या॥सू·ये·हेग्निंस्विष्टकृतमयालग्निरग्नेःप्रियाधामान्ययाट्सोम
स्यप्रिया·लग्नेंप्रिया·सोमस्यप्रिया·।सवितुः।उ·।प्रिया·सरस्वत्या[illegible]ःप्रिया॰पूष्णःप्रिया·मरुतांस्वत
वसांप्रिया·इ॥विश्वेषांदेवानां।उ·।प्रिया·इ॥द्यावापृथिव्योः॥उ॰॥प्रिया·लिंद्राग्न्योःप्रिया॰वरुण ए

© Dharmartha Trust J&K. Digitized by eGangotri

स्य प्रिया॰ मरुतां प्रिया॰ दू॥ कस्य॥ ३॰॥ प्रिया॰ ल ग्नेरनीकवतः प्रिया॰ णु मरुतां सांतपनानां प्रिया॰ णु म
रुतां गृहमेधानां॰ मरुतां गृहमेधिनां वा प्रिया॰ मरुतां क्रीडिनां प्रिया॰ लदित्याः प्रिया॰ महेंद्रस्य प्रिया
विश्वकर्मणः।३॥ प्रिया॰ इद्धुनासीरयोः प्रिया॰ वायोः।३॥ प्रिया॰ सूर्यस्य।३॰। प्रिया॰ इं देवानामाज्य
पानां प्रिया धामानि यक्षदग्ने रित्यादि॥ इमो अग्न इति याज्या॥ पर्वीजनादिमार्जनांतं समानं॥ ततो द
क्षिणां समानयंति॥ अध्वर्योर्द॰ क्षिणाभिमर्शनं॥ तत्रोहः॥ प्रजापतेर्भागाः स्थोर्जस्वंतः पयस्वंतः प्राण
पानौ मे यात समानव्यानौ मे यातोदानव्यानौ मे यात प्रथमजवत्समिथुनगवर्षभश्वेताश्वाः स्थोर्जं म
यि धत्तो क्षि॰ तयः स्थ मा मे क्षेष्ठ मयुत्रामुष्मिंल्लोक इह च॥ दक्षिणासंकल्पः। अमीषामेष्टिकैका
हिकानां चातुर्मास्यानां समृध्यर्थं प्रथमजवत्समिथुनगवर्षभश्वेताश्व दक्षिणा ब्र॰ ह्मणे होत्रे ध्वर्यवे प्र
तिप्रस्थात्रे ग्नी॰ ध्रे च समविभागेनाहं संप्रददे॥ यो यो विभागः स प्रतिगृह्यतां॥ मया पि दत्ता॥ त्रिवारं

© Dharmartha Trust J&K. Digitized by eGangotri

५२ रुद्रायत्वेतिप्रतिग्रहमंत्रः॥ यमायत्वेतिचतुर्थः॥ वोदादित्यनुमंत्रणंप्रत्येकं॥ अस्मद्दाता॥ अथद
क्षिणादानांतेपिब्या। ननुउपहूयेलांपिबेतिसूत्रात् ऐकाहिकेषुवैशेषिकोधर्मइलोपह्वानांनंतर
मेवपिब्याभवति॥ ननुउपहूयेलांपिबेतिसूत्रेल्पवादेशश्चाप्रत्ययेननानंतर्यक्रमउच्यते। किंतु
समानकर्तृकत्वमितितस्मादविरुद्धमितिचेत्। न। समानकर्तृकत्वेउपहूयेलांपिब्याप्रारंभणी
येतिवाक्यार्थःसंपद्यते॥ तथाचयएवइलोपह्वानकर्त्तासएवपिब्यारंभकर्त्ताइतिभवति॥ होतुश्च
प्रारंभकर्तृत्वाभावात्॥ अथसापिब्याहोतरापिकर्त्तव्येतिचेत्॥ न॥ इलोपह्वानानंतरमेवकर्तृत्व
स्यैववाक्यार्थत्वात्॥ होतुश्चतत्वानुपपत्तेः॥ तस्मात्इलामुपहूयहोतर्यैवस्थितेपिब्याभ
वतीतिअप्रावाहारादिनावाक्यार्थःसंपद्यते॥ तथाचइलोपह्वानानंतरमेवपिब्याप्राप्नोति। नैवं।
अंवकादूर्ध्वमनुयाजप्रभृतिइतिउत्तरसूत्रात्अनुयाजादेःकर्मणउत्तरत्रतंत्रानुसंधानप्रत्ता

© Dharmartha Trust J&K. Digitized by eGangotri

वेउपक्रमः सिध्यति॥ तथा च इडासुपहूय पिण्डारंभे अनुयाजादेस्तंत्रानुसंधानप्रसवे मध्यपदा
र्थानां भस्ममार्जनादीनां लोप एव स्यात्॥ न च तन्न्याय्यं॥ तस्माद्दक्षिणादानान्त एव पिण्डा। इडासुप
हूयेति होतुरसाधारणपदार्थानन्तर्यं पिण्डं प्रति विवक्षितं॥ भस्ममार्जनदक्षिणादानानां सर्वसा
धारणत्वात्॥ सा च पिण्डा सकला परिकल्पिता॥ ततः पिण्डं परिसमाप्य त्रैयंबके च कर्मणि परि
समाप्ते अवांतराः संचरप्रविष्टाः संतस्तंत्रं समापयंति उल्मुकसमासादि। एषा ते अग्न इत्यस्य ऊहः॥
एते वामग्नीसमिधौ ताभ्यां वर्द्धेथां चाप्यायेथां। वर्द्धिषीत्यादि॥ न वानुयाजान्यजंति। त्र्यंब
काद् ऊर्ध्वमनुयाजप्रभृतीति सूत्रात्॥ सूक्तवाके॥ सूक्ता ब्रूहीत्युक्तः॥ इदं द्यावापृथिवीत्यादि॥
अग्निर्हविरजुषत॥ सोमो हविरजुषत॥ अग्निर्हविरजुषत॥ सोमो हविरजुषत॥ सविता ३। हविरजुष
त॥ सरस्वती हविरजुषत॥ पूषा हविरजुषत॥ मरुतः स्वतवसो हविरजुषन्त। विश्वेदेवाः ३।

© Dharmartha Trust J&K. Digitized by eGangotri

५३ हविरजुषं॰क्रत।द्यावापृथिव्यौ।उ॰।हविरजुषे॰क्रातां॥ वरुणो हविर॰क्रत॥ मरुतो हविरजुषं॰क्रत।का॰।
उ॰।हविर॰क्रत॥ अग्निरनीकवान्‌हविर॰क्रत॥ मरुतः सांतपना हविर॰जुषं क्रत॥ मरुतो गृहमेधा हविरजु
षं॰क्रत।मरुतो गृहमेधिनो वा॰क्रत।मरुतः क्रीलिनो हविरजुषं॰क्रत॥ अदितिर्हविर॰क्रत॥ महेंद्रो हवि॰
53 र॰क्रत॥ विश्वकर्मा।उ॰॥ हविर॰॥ क्रत।शुनासीरौ हविरजुषे॰क्रातां॥ वायुः॥उ॰॥ हविर॰क्रत॥ सूर्यः।उ॰।
हविर॰क्रत॥ देवा आज्यपा आज्यमजुषं॰क्रत॥ अग्निर्हौत्रेण हविर॰क्रत॥ वाजिनो देवा हविर्जोषयि
ष्यंते वर्द्धयिष्यंते महो ज्यायः करिष्यंते। अस्या मृध दित्यादि नमउपेत्यंतं॥ ततो वाजिनयागः पूर्ववत्॥
शंयोर्वाकाद्या हवनीयोपस्थानांतं समानं॥ अध्वर्यो रेव वेदस्पस्तरणा वाचन विमोचनानि न प्रति प्रस्था
तुः। उत्तरस्यां वेदौ होतृकर्मेति वचनात्॥ समिष्टयजुरंते वारुणीष्टिं॰उरुं हि राजेत्यनुसंपन्नेत्यत आ रा
रभ्य पत्नीसमिदाधानांतां सर्वं वद्भवति॥ अथ याजमानं॥ उत्तमे प्रयाजे॥ इदमग्नये सोमायाग्नये सोमा प

यसवित्रेसरस्वत्यैपूष्णेमरुद्भ्यःस्वतवद्भ्योविश्वेभ्योदेवेभ्योद्यावापृथिवीभ्यामिंद्राग्निभ्यांवरुणायम
रुद्भ्यःकायाग्नयेनीकवतेमरुद्भ्यःसांतपनेभ्योमरुद्भ्योगृहमेधेभ्यो॰मरुद्भ्योगृहमेधिभ्योवा॰मरुद्भ्यः
क्रीलिभ्योदित्यैमहेंद्रायविश्वकर्मणेशुनासीराभ्यांवायवेसूर्यायदेवेभ्यआज्यपेभ्योवाजिभ्यः।प्र
धानहविषां॥इदमग्नये॥इदंसोमाय।इत्यादिचतुर्थ्यंतानिपूर्ववत्॥इदमग्नयेस्विष्टकृते॥बृह
ते॥अग्नेःसोमस्यसवितुःसरस्वत्याःपूष्णोमरुतांस्वतवसांविश्वेषांदेवानांद्यावापृथिव्योरिंद्राग्न्यो
र्वरुणस्यमरुतांकस्याग्नेरनीकवतोमरुतांसांतपनानांमरुतांगृहमेधानां॰मरुतांगृहमेधिनांवा॰म
रुतांक्रीलिनामदित्यामहेंद्रस्यविश्वकर्मणःशुनासीरयोर्वायोःसूर्यस्योज्जितिः॥अग्निःसोमः
सवितासरस्वतीपूषामरुतःस्वतवसोविश्वेदेवाद्यावापृथिवीइंद्राग्नीवरुणोमरुतःकोग्निरनीक
वान्मरुतःसांतपनामरुतोगृहमेधाःमरुतोगृहमेधिनोवा॰मरुतःक्रीलिनोदितिर्महेंद्रोविश्व

© Dharmartha Trust J&K. Digitized by eGangotri

५४ कर्मास्तुनासीरौवायुःसूर्यस्तमपश्तुदंत्व॰। सक्कवाके॥ इदमग्नयइत्यारभ्योत्तमप्रयाजवत्॥ अग्नयेहोत्राय
वाजिभ्यइतिविशेषः॥ अन्यत्पूर्ववत्॥ ततःप्रणीताविमोकानंतरंदिगभ्युक्षणादास्यभागप्राशनांतंस
54 कलंयाजमानं॥ ततोवपनं। हस्तात्तस्ययजमानस्यब्राह्मणोतर्पयितव्यावाइतिद्वेषः॥ अमीषामेकाहि २
कानामेष्टिकानांचातुर्मास्यानांसमृध्यर्थेयथा॰ब्राह्मणोद्वावहंतर्पयिष्ये॥ भगवत्य॰। तत्श्चत्वारिंशता
नि॥ नन्वत्रचतुर्ष्वेवचातुर्मास्येषुचत्वारीतिकारिकावाक्यंमूलं॥ तेनापिप्रतिपर्वंहस्तविभजनायांप्रति
पर्वशतंलभ्यते॥ तदत्रैकाहिकानामपि॰अथवाप्येकपर्वणीतियोगविभागेनसंकोच्यहस्त्याचएकप
र्वत्वविधानात्॥ शतमात्रमेवलभ्यते॥ वारुणप्रघासतंत्रारंभत्वादेकपर्वत्वं॥ हविषामनाम्नात्वेना
पितंत्रकल्पनादेकपर्वत्वं॥ सत्यं॥ यद्यप्येकपर्वत्वमस्तितथापिपालस्थयत्नार्थवादाच्छतचतुष्टयु
क्तं॥ अन्यथाचातुर्मास्यशब्दोगौणएवस्यात्॥ नित्योपात्रशतेनापिब्राह्मणभोजनेनहूर्णतासंभवा राम
५

© Dharmartha Trust J&K. Digitized by eGangotri

त्।। इत्यलं।। सत्रैष०। त्रयोवैयज्ञे०।। ततः आशीर्वचनादिश्चरिदानीं।। तत्रैकं विचार्य।। कीलिन्यउत्तरं
अदितिर्नयुज्यते। विश्वकर्मणोनंतरमेवयुज्यते।। तत्रैवोत्पन्नोक्तत्वात्।। अन्यदपि।। मित्रएवं
वायुक्तः।। अदितेर्विकल्पात्।। न।। अध्वर्युवशाद्भविष्यति।। कोहेतुः।। एतावत्त्विष्टीनामानुपूर्व्यं
हविषांदैवतउत्तरूपांस्तुतायांवाध्वर्युमनुविदधीतेतियत्नात्।। उत्पन्नेकिमितिनायंनियमः।।
तत्रएतत्संस्थावैसाकमेधाइत्यादिसाकमेधसमाप्तिहेत्वर्थवादात्।। मरुद्भ्यः कीलिभ्यःसप्तक
पालोदित्यैचरुरितिकीलिनोहविर्विधेरनंतरंकात्यायनवचनाद्युक्तनंतरंतत्रअदितिरिति।।
मैत्रस्वरुरितित्सावकाशंप्रह्मातो।। तस्माद्दैवाहिकेष्वदितिरेवाद्युपूर्वीस्यविषयात्।। ऐष्टिका
वा निसौत्तर्मीस्यानिसंस्थानि।। अथैकाहिकयास्तुकचातुर्मास्यानांपद्धतिःपरिकल्प्यते। तान्यपि
फाल्गुन्यांपौर्णमास्यांचैत्र्यांवाप्रारंभणीयानि इतिभाष्यकारापद्धतिकाराः। परंत्वनित्योयत्र

मा २

© Dharmartha Trust J&K. Digitized by eGangotri

५५ 55 हीतत्वेनआवश्यककर्त्तव्यतयाकेनचिन्निमित्तेनमुख्यकालासंभवेपवीतरसंबंधिसमयेप्य
नुष्ठेयानि। एतेषामपिहविर्यज्ञसंबंधित्वात् आवश्यकार्त्तत्वंभाष्यकारपद्धतिकाराभ्यांस्थापितं
एतेषामपिमलमासेऽननुष्ठानं॥ पूर्वनिर्णयस्यसमानत्वात्॥ गुरुशुक्रयोरस्तेऽनारब्धयशो
र्यजमानस्यनभवति। प्रथमारंभस्यनिषेधस्यस्थापितत्वात्॥ ननुचातुर्मास्यारंभेगुणभूतस्य
यशोरंभ्यारंभोजातएव। नेत्युच्यतेविशेष्यमात्रस्यक्रियान्वयेविशेषणस्यापिक्रियान्वयस्ये
ततर्हिदेवदत्तस्यभुजिक्रियान्वयेदंडस्यापितत्संबंधःस्यात्॥ एवंचलोकविरुद्धं॥ तस्माद्ना
रब्धयशोदोषएव॥ आरब्धयशोरनारब्धचातुर्मास्यस्यकिंस्त्वितवाच्यं॥ उभयारब्धस्यासंदि
ग्धं। ननुयशोगुणभूतत्वंनामकिं। नाप्रधानत्वं॥ आज्यभागस्विष्टकृदंतरालयागत्वस्योभय
त्रतुल्यत्वात्॥ अननाधिकफलयोगित्वमितिचेत्॥ न॥ अप्र-वीर्थप्रतिपादकविधेरयोगः एम
अंतरेणाज्यभागौस्विष्टकृतंचेतिपरिभाषया अप्रधानत्वस्यैवाभावात् २ प

© Dharmartha Trust J&K. Digitized by eGangotri

स्यात्॥ आधिकवित्तव्ययायाससाध्येऽप्रवृत्तेर्योगाच्च॥ अथ तंत्रांत[illegible]पातित्वं तत्त्वमिति चेत्॥ न॥ पशु
तंत्रमहत्त्वेनै[illegible]तत्रं त्रांतःपातित्वाच्चातुर्मास्यतंत्रस्य॥ तंत्रांतरारब्धत्वमिति चेत्॥ न॥ संस्थांतरार
ब्धत्वेन सर्वेषां गौणत्वापत्तेः। उ[illegible]त्वाज्जैपेसत्युच्यते॥ गुणभूतत्वं नाम यशोरस्तुरूपत्वं॥ तच्च सजाती
यव्यावृत्तिजनकं विशेषणं॥ पशुमत्त्वचातुर्मास्येष्वित्यत्र विशेषणविशेष्यभावलक्षणसंबंधस्य
मत्वर्थस्यस्पष्टत्वात्॥ यथा कात्यायनेन सपशुबंधपशुतंत्राधान्यादित्यत्र पशुनासह वर्तमाना
निसपशूनि चातुर्मास्यानीति सहयुक्तेऽप्रधान इति सहयोगात् पुत्रेण सह आगतः पितेतिवत् पशु
व्याप्तुरूपत्वमेव व्यवसीयते॥ ननु समत्वे को दोषः। प्रारंभादियोगपठितानामिष्टीनां अनुक्रमा
नुपपत्तेः। ननु निरूढपशुव्यतिरिक्तत्वे सत्यपशुरूपत्वमेव पशूनामित्यायातं॥ न॥ अग्नीषोमीय
स्यपशुपुरोलाशमन्वंविदेनस्यभ्यो हवींषि इत्यत्र हविषामन्वायातत्वात्। अत एव तत्र यशोस्तु

© Dharmartha Trust J&K. Digitized by eGangotri

५६ ख्यत्वेहविषामत्यंतगुणत्वेस्विष्टकृत्संदेहेपुरोलाशस्विष्टकृत्समवाययीतिपरिभाषितं॥ इतोपिसप
शुपशोर्गुणत्वमेव। मुख्यत्वेपशुपुरोलाशमन्वायातेषु चातुर्मास्यहविःषुपुरोलाशस्विष्टकृति
प्राप्तेपुनःयाज्ञिकाःस्विष्टकृदितिसूत्रंव्यर्थमेवस्यात्॥ तस्मादत्रपशोर्गुणत्वेपियाज्ञिकाःस्विष्टकृ
दितियुज्यते। अपिच॥ अग्नीषोमीयेमुख्ये अन्वायातेषुहविःषु आवाहनादिनिगमस्थानभाक्त्वे
प्राप्तेनपशुतंत्रेहवींषिचोद्यमानानिनिगमानूलमंतेइतिनिगमस्थाननिषेधःकृतः। सपशुषुवै
त्पशोर्मुख्यत्वंतदापशुपुरोलाशमन्वायातानांहविषांनिगमस्थाननिषेधेप्राप्तेषुनरपिनिग
मस्थानवर्जमितिनयुज्यते॥ तस्मादित्थमध्यवसीयते॥ सपशुषुयशोर्गुणत्वंहविषांमुख्यै
त्वमिति॥ ननुहविषांमुख्यत्वे अन्वायातत्वंनयुज्यते॥ न॥ लघुमहतोर्महतःप्राप्यमाणादितिन्याये
नतंत्रांतःपातित्वेनदोषः। एतदारंभे आभ्युदयिकंश्राद्धमपिएकतरारंभेभवति। आरब्धोभक्षसन

56

© Dharmartha Trust J&K. Digitized by eGangotri

भवत्येव॥ अस्य विषयस्य विषयकृतनिर्णीयत्वात्॥ पूर्वस्यां पौर्णमास्यां इष्टिद्वयं भवति॥ पूर्वं
वैश्वानरपार्जन्या। पश्चादाग्रावैष्णवी आरंभयक्ष्यमाणसंयोगविधानात्॥ अनयोरुत्सर्गतः आ
ग्निरवाध्या। ननु वैश्वानरपार्जन्यायाः केवलचातुर्मास्यआरंभेशास्त्रांतरे श्रूयमाणत्वात् पशुतंत्रे
प्रातुर्यसंकलनात्समानभविष्यति। न। विद्यमानायामपि प्रातुर्यसंकलनायां चातुर्मास्यानामे
वस्तुव्यत्वात् भविष्यति॥ पशुतंत्रमहत्त्वेपि चातुर्मास्यतंत्रेणैवारंभात्॥ पशोर्विशेषणत्वेपि
चातुर्मास्यानां आरंभे यत्र प्रथमः पदार्थो न भवति॥ तत्र समानभविष्यत्येव॥ प्रथमो हि पदार्थः आ
रंभ इति स्थापितं॥ एतस्यास्त्वेषां भसंयोग एव विधानात्॥ तस्माद्दैष्टिकपाशुकारंभे चातुर्मा
स्यानां विशेष्यत्वाद्वैश्वानरपार्जन्या पूर्वा भवति॥ पूर्वस्यामेव पौर्णमास्यामपराह्णे आग्रावैष्ण
वी पश्चात् भवति। ननु प्रथानपशुपक्रमे आग्रावैष्णवाववयक्ष्यमाणस्येत्यनेन यक्ष्यमाणसं

© Dharmartha Trust J&K. Digitized by eGangotri

५७ योगेन तावदेषा विहिता। इहत्वपशोर्गौणत्वात् विशेष्याणां चातुर्मास्यानां यक्ष्यमाणत्वात् सा न भवि
ष्यति॥ न॥ यत्तु गुणभूतस्य पशोराग्नावैष्णवी न भवति तत्तु आग्नावैष्णवी च यक्ष्यमाणस्येत्यत्र पशुनाय
क्ष्यमाणस्य यजमानस्याग्नावैष्णवी विहिता॥ तथा च पशुमत्त्वचातुर्मास्ये शुसा तावदुत्सर्गतः प्राप्नोति
कं ।सत्यप्येवं पूर्वेद्युः पार्श्वकर्मेति शुन रपि पशुमत्त्वकरणे सा विहितांतनएवमध्यवसीयते आग्नावैष्
णवीत्व यक्ष्यमाणस्येत्यस्मिन्सूत्रे स्वतंत्रेण पशुना यक्ष्यमाणस्यैषा भवति॥ गोणे शुत्सर्गपक्षादि
शुन भवत्येव॥ स पशुशु गौणत्वेपि भवति॥ तत्रैव प्रतिप्रसवात्॥ अतः शेकाहिके ष्टपियाशुके
शुपूर्वस्यां पौर्णमास्यां इष्टिद्वयं भवति॥ तत्र पूर्वा वैश्वानरपार्जन्या॥ सा च सकला चातुर्मास्यारंभेप
रिकल्पिता॥ उद्धरणे विशेषः। चातुर्मास्यारंभनिमित्तं वैश्वानरपार्जन्यार्थं गार्हपत्यादाहवनीय
मुद्धरामि॥ चातुर्मास्यारंभनिमित्तं वैश्वानरपार्जन्यार्थं गार्हपत्याद्दक्षिणाग्निमाहरामि॥ इत्या रा ५८

© Dharmartha Trust J&K. Digitized by eGangotri

द्विब्राह्मणतर्पणपर्यंता ॥ अथाग्नावैश्वदेवी चापराह्णे ॥ यतो वक्ष्यमाणसंयोगेनाग्नावैश्वदेवीं विधाय नि
र्वचनं चाशिषामिति प्रतिप्रसवं कुर्वन् ज्ञापयति ॥ इत्याशिषां स्थान इलायां सूक्तवाके चाहृताक्कृ
तानीयसवनिकाः पुरोडाशे लाया इत्यादि दीक्षणीयाधर्मा एव प्रतिप्रसूयंते ॥ तस्मादन्येपि दाक्ष
णीयाधर्मा एव भवंति ॥ अतोपराह्णे पौर्णमासीविकारः पंचदशसामिधेनीका उपांशुहविर्विराजौ
स्विष्टकृतो नित्ये वा इत्येवमादयो विधयः सिद्धा भवंति निर्वचनं चाशिषामिति चशब्दादत्र सकला
॥ सा च परिकल्प्यते ॥ उद्धरणं ॥ पशुप्रारंभनिमित्ताग्नावैश्वदेवीष्ट्यर्थं गार्हपत्यादाहवनीयमुद्धरामि ॥
पशुप्रारंभनिमित्ताग्नावैश्वदेवीष्ट्यर्थं गार्हपत्याद्दक्षिणाग्निमाहरामि ॥ अग्न्यन्वाधानं ब्रह्मवरणं ॥ पशुप्रा
रंभनिमित्तया अन्वाहार्यदक्षिणया आग्नावैश्वदेव्येष्ट्याहं यक्ष्ये तत्र मे त्वं ब्रह्मा भव ॥ ब्रह्मण आसनसंस्का
रः ॥ तत आध्वर्यवं ॥ आसन्ने हविषि व्रतग्रहणं ॥ एहि होतरित्युक्ते कं प्रय[illegible]घादि पंचदशसामिधे

न्यः॥ आवाहने॥ अग्निमग्न आवह॥ सोममावह॥ अग्नाविष्णू। ऊ। आवह। देवां इत्यादि॥ अध्वर्युकः स
वैषां स्तुत्वं चेतत्क्रतुं हस्तदा तथैवास्माभिरपि विधेयं॥ स्वगादापनांतं प्रकृतिवत्॥ पंच प्रयाजाः। उत्त
मे प्रयाजे॥ स्वाहाग्निं स्वाहा सोमं स्वाहा॥ अग्नाविष्णू॥ ऊ॥ स्वाहा देवा आज्यपा इत्यादि॥ वार्त्रघ्नावाज्य
भागौ॥ प्रधानस्य॥ अग्नाविष्णुभ्यां। ऊ। अनुब्रूहीत्युक्ते। अग्नाविष्णू महि तद्वां महित्वं पातं घृतस्य गु
ह्यानि नाम॥ दमे दमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमाचरण्यात्। ऊ। ईशम् उच्चैः॥ इति पुरो०॥
अग्नाविष्णू। ऊ। यजेत्युक्ते॥ भू· ये· हे अग्नाविष्णू अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जु
षाणा॥ दमे दमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमुच्चरण्यत्। ऊ॥ वौ४षट्॥ ईज॥ इति याज्या
विराजो स्विष्टकृतेमित्येवा भू· ये· हे अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रिया धामा· सोमस्य प्रिया या० इ। रा
अग्नाविष्णोः। ऊ। प्रिया० इ देवानामित्यादि॥ इळोपह्वानादि मार्जनांतं प्रकृतिवत्॥ भागचतुष्टक

© Dharmartha Trust J&K. Digitized by eGangotri

रणां षडवत्तं च न भवति। द्विदेवत्यत्वात्॥ अन्वाहार्यो दक्षिणा॥ अभिमर्शनं॥ संकल्पः॥ अस्या आ
ग्नावैष्णव्या इष्टेः समृध्यर्थं अन्वाहार्यं दक्षिणां ब्रह्मादिभ्य ऋत्विग्भ्यो ददे। यो यो विभागः॥ मया
पि दत्ता इत्यादि। एषा ते अग्ने॥ त्रयो नुयाजाः॥ सूक्तवाके॥ सूक्ता प्रहीत्युक्तः॥ इदं द्यावापृथिवी त्या
दि॥ अग्निर्हविर० क्षत॥ सोमो हविर० क्षत॥ अग्नाविष्णू उ०। हविरजुषेता० क्षातां॥ देवा इत्यादि।
यजमाननामग्रहणमत्र भवति। सोमे एव निषेधात्॥ प्रतिप्रसवः च शब्दात्॥ शंयोर्वाकः॥
पत्नीसंयाजादि आहवनीयोपस्थानां तं प्रकृतिवत्॥ अथ त्यागाः। उत्तमे प्रयाजे॥ इदमग्नये
सोमायाग्नाविष्णुभ्यां देवेभ्य आज्यपेभ्यः आज्यभागप्रधानादीनां। इदमग्नये॥ इदं सोमाय॥
इदमग्नाविष्णुभ्यां॥ इदमग्नये स्विष्टकृते॥ अवहनो। अग्नाविष्णू हजिति। अग्नाविष्णूतमय
उदतां। सूक्तवाके। इदमग्नये सोमायाग्नाविष्णुभ्यां देवेभ्य आज्यपेभ्यो ग्नये होत्राय। शेषं प्रकृ

© Dharmartha Trust J&K. Digitized by eGangotri

तिवत्सं ततो दिगास्तुकृणादिभागमङ्गेतं याजमानं। ब्राह्मणतर्प्पणं॥ अस्यापस्तागावैस्मव्याइष्टे सह
धर्थ्यं यथा॰ब्राह्मणमेकमहं तर्पयिष्ये॥ भगवन्तः। स हैषा। त्रयोवैः। इत्या गावैस्मवीसमाप्ता॥४॥ अथ
कात्विग्वरणं॥ आङ्गिरस्मात्वान्ब्रह्महोत्र धर्युमैत्रावरुणप्रतिप्रस्थात्राग्नीध्रान् आसनेषूपवेश्य यज
मान उदङ्मुखो वृणीते॥ अहं तान् दक्षिणाज्ञानुन्यादाय गोत्र अमुकशर्मन् प्रथम अवत्सामिथुनग
वर्षभस्वेता स्वाजदक्षिणो ऐकाहिकैः पाशुकैश्चातुर्मास्यैरहं यक्ष्ये तत्र मे त्वं ब्रह्मा भव भवामीति प्रति
वचनं॥ एवं सर्वेषां। अर्चनं॥ पुष्पताम्बूलदानं॥ अथाध्वर्यवं॥ दंपत्योरहतवासःपरिधानं॥ अग्निहो
त्रागारे समारोपं कृत्वा वहिर्निर्मथ्य भूसंस्कारं कृत्वा अध्वर्युर्गार्हपत्यं स्थापयति॥ ततः स्वातुर्मास्या
र्थमुद्धरणं॥ न यजमानः करोति॥ नियमात्॥ तत्र प्रयोगः॥ पंचभूसंस्कारान् कृत्वा ॥ अग्न्येकदेश
मादाय॥ ऐकाहिकपाशुक चातुर्मास्यार्थं गार्हपत्यादाहवनीयमुद्धरामि॥ ऐकाहिकपाशुकचा

© Dharmartha Trust J&K. Digitized by eGangotri

दु

त्तुर्मास्यार्थं गार्हपत्याद्दक्षिणाग्निमाहरामि॥ अग्न्यन्वाधानं॥ ब्रह्मवरणं। चातुर्मास्ययज्ञदक्षिणे
रैकाहिकैः यास्तुकैर्वा चातुर्मास्यैरहं यक्ष्ये तत्र मे त्वं ब्रह्मा भव॥ ब्रह्मणो निरस्तः परावसुरित्यादि य
थोक्तं। ब्रह्मपक्षे छिन्नावसत्यं तं नामदर्भं तृणोडुंवरशाखादिनो [illegible]रवेदिच्छादनं तं पूर्वस्मिन्नपि
दिवसे कुर्वंति। तथा च कात्यायनवचनं प्रधानसमस्तं छिन्नावसतीतिवसत्यार्थो ज्योतिष्टोमपरइ
ति प्रातरग्निप्रणयनं॥ अग्निर्मथ्यां प्रणीयमानाभ्यामित्युक्तः॥ प्रदेवं देवेभ्यो त्यादि प्रशंतिवत्॥ ततो
यूपांजनपर्यंतमाध्वर्यवं॥ यूपांजने विशेषः॥ यूपायाज्यमानायानुब्रूहीत्युक्तो होता उत्तरवेदेरा
हवनीयांतरतः समीप उपविश्य वक्ष्यमाणं पठेत्। छ॥ अंजंति त्वामध्वरे देवयंतो वनस्पते मधु
ना दैव्येन॥ यदूर्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ३ अंजंति दैव्येन॥ यदू० उपस्थे ३
अंजंति दैव्येन॥ अत्र विरमेत्॥ ततो ध्वर्युणा उच्छ्रियमाणायानुब्रूहीत्युक्ते। यदूर्ध्व० उपस्थे ३ उच्छ्र

© Dharmartha Trust J&K. Digitized by eGangotri

६० यत्त्ववनस्पतेवर्ष्मन्पृथिव्या अधि।।हुमितीमीयमानोवर्चोधायज्ञवाह्सो३समिद्धस्यश्रयमाणःपुर
स्ताद्ब्रह्मवन्वानोअजरंसुवीरं।।आरेअस्मदमतिंबाधमानउच्छ्रयस्वमहतेसौभगायो३जातोजायतेसु
दिनत्वेअह्नांसमर्थआविदथेवर्धमानः।।पुनंतिधीराअपसोमनीषादेवयाविप्रउदियर्त्तिवाचो३
ऊर्ध्वऊषुणऊतयेतिष्ठादेवोनसविता।।ऊर्ध्वोवाजस्यसनितायदंजिभिर्वाघद्भिर्विह्वयामहो३ऊ
र्ध्वोनःपाह्यंहसोनिकेतुनाविश्वंसमत्रिणंदह।।अत्रविरमेत्।।ततोध्वर्युणापरिवीयमाणायात्तुब्रू॰
हीत्युक्ते।।कृधीनऊर्ध्वांचरथायजीवसेविदादेवेषुनोदुवो३युवासुवासाःपरिवीतआगात्सउश्रेया
न्भवतिजायमानः।।तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतो३युवा॰मानः।।तंधी॰यंतो३
युवा॰मानः।तंधी॰देवयंतो३म्।।इतित्रिः।।यूपांजनंचशांखायनानांयजमानेनैव कार्यंस्वभ्यक्तंस्त्व
यमेवयजमानःकुर्वीतेतिस्मृतेः।।इतियूपांजनं।।अत्रस्थालीस्थागासादनेकृतेयजमानस्यव्रत

ग्रहणं।उन्नरत्वेहद्विरासादनेत्तुनाप्रथमंवानियम्यतइतिन्यायात्॥ततोग्निमंथनं॥तिष्ठन्नन्वाह
ग्निमंथनीयाः।अग्नयेमथ्यमानायानुब्रूहीत्युक्तः।अभित्वादेवसवितरित्यादिःतंमर्जयंतेतिस
क्तद्वन्नायज्ञेनयज्ञमयजंतदेवाइत्येतयापरिदध्यात्।त्विषुक्रियेषुवाजिनोऽयज्ञेनयज्ञमयजंत
देवास्तानिधर्माणिप्रथमान्यासन्।तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवोऽयज्ञेनन्दे
वोऽयज्ञेनन्देवोऽस्मि।इतित्रिःपरिदध्यात्॥यद्यपिचात्वमीस्यप्रकरणेवैश्वदेवादिपर्वणितंमर्ज
यंतस्त्वक्रतुमित्येषेवाग्निमंथनीयानांपरिधानीयादृश्यतेतथापिपशौयज्ञेनयज्ञमित्येषैव
परिधानीयाभवति॥अथयत्रपशुरालभ्यतेतद्देतांपराचीमनूच्ययज्ञेनयज्ञमयजंतदेवाइति
३ त्रिष्टुभापरिदधीतीतिश्रुतेः॥अग्नीषोमीयपशुकारणेयज्ञेनयज्ञमितिपरिधायेतिलक्षणात्पशा
वेषैवपरिधानीया।इत्यग्निमंथनं॥ततएहिहोतरित्युक्तआसन्यचात्वालोत्करावंतरेणप्रपद्य

© Dharmartha Trust J&K. Digitized by eGangotri

६१ 61

वर्हिराकम्पकंप्रपद्यादिसप्तदशसामिधेन्यः॥अग्नीमहांतोस्थइत्यादिसकलसूक्तंपरिस्तुवोस्थइत्यंतं।
आवाहने॥आवाहतंदेवान्यजमानाय॥अग्निमग्नीआ४वहतं।सोममावहतं॥इंद्राग्नीआवहतं।वनस्प
तिमावहतं॥देवांइत्यादि॥आचवहतंजातवेदसावित्यादिचा।ततोभूम्यभिमर्शनंकृत्वातिष्ठति॥च्चतु
र्वचातुर्मास्यदेवतानामपीज्यमानत्वात्तेषामावहनंकिंनकृतं॥सत्यं।इतिचेत्॥नपशुतंत्रेहवी
षिचोद्यमानानिनिगमांलभंतेइतिप्रधानपशोनिषेधेन्नातेपियदत्रतुननिगमस्थानवर्जमितिवा
चनिकंप्रतिषेधंकरोतितत्तंत्रवाकुल्यात्चातुर्मास्यहविषांप्रधानानांगुणभूतेपिपशौनिगम
स्थानलाभप्रतिषेधार्थं॥अतआवाहनादिनभवतीतिज्ञेयं॥होतामानुषइत्युक्तोदेवसवितरित्या
दिकं..नपति।अध्वर्युःसंप्रेष्यपरमोधीरितिजपित्वातिष्ठति॥एवंस्थितेमैत्रावरुणोपिआचम्यचा
त्वालोत्करावंतरेणप्रविश्यहोतुर्दक्षिणतःप्राङ्मुखस्तिष्ठेत्॥यजमानआगत्यउदङ्मुखोभूत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

आश्वर्यवलक्षणोर्कथैर्दुंवरं दंडं आधारसमर्थं मैत्रावरुणाय दद्यात्। मित्रावरुणयोस्त्वा प्रशास्त्रोः
प्रशिषा प्रयच्छामि यज्ञस्यारिष्ट्यै इति मंत्रेण। मैत्रावरुणोपि तं दंडं मित्रावरुणयोस्त्वा प्रशास्त्रोः
प्रशिषा प्रतिगृह्णामि यज्ञस्यारिष्ट्यै इति मंत्रेण प्रतिगृह्णीयात्॥ ततो मैत्रावरुणो दक्षिणं बाहुमन्वा
वृत्य होतारं दक्षिणहस्ते सुक्त्वाग्रतः प्रतिपद्यते। गार्हपत्यं परीत्य दक्षिणमेदं दक्षिणतो गत्वा दक्षि
णवेदौ तत्संस्तीर्ण आसने उपविशेत्॥ होता च प्रकृतिवत् ऐंद्रीमित्यादिकं हुत्वा मंत्रवदुपविश्य एका
ऊ दशप्रयाजान्यजेति। ननु मैत्रावरुणस्य दक्षिणस्यां वेदौ अवस्थानं श्रुतौ न लभ्यते। सत्यं। उत्तरस्यां वेदौ
होतृकर्मेति होतुरुत्तरवेदेर्नियमात् मैत्रावरुणस्य दक्षिणस्यामनुष्ठानमविरुद्धं। इतत् उत्तरत्रैषाः
सर्वत्र मैत्रावरुणस्यैव भवंति॥ सप्रैषावदाने उ रोनुवाक्या अपि॥ अनुवचनान्यपि तथा प्रैषा मैत्रा
वरुणस्य सप्रैषेषु च पुरोनुवाक्यास्तथानुवचनानीति सूत्रात्॥ ततः पूर्वगृहीतं दंडमवष्टभ्य। किंचि

© Dharmartha Trust J&K. Digitized by eGangotri

६२ तन्नःक्रुञ्चइवतिष्ठन्मैत्रावरुणःसकलांस्वक्रियांकुर्यात्॥क्रुञ्चइवप्रणतोब्रूयादितिस्मृतेः।
होतावस्वासनस्थोयाज्याःपठेत्॥ततोध्वर्युणासमिधःप्रेष्येत्युक्तोमैत्रावरुणो॥होतायक्षदग्निंसमिधा
सुषमिधासमिद्धमित्येवमादिनाप्रैषसूक्तेनतनूनपान्नाराशंसान्यतरप्रयोगेणप्रत्येकमुत्तरेषुप्रेष्येत्यु
क्तोहोतारंप्रेष्यति॥प्रैषाणांहेत्वर्थः।अतिप्रैषंहोताआप्रीसूक्तानांमध्येयदार्षेयोयजमानस्तदार्षेय
स्याप्रीसूक्तस्ययाज्यांपठतियाज्याधर्मेण।सप्रैषेदेवतादेशनंनभवतिप्रैषेणकृतत्वात्॥सप्रैषेत्वन
विद्यतइतिनिषेधाच्च॥तनूनपान्नाराशंसान्यतरप्रयोगोहोतुरपि॥एवमनेनक्रमेणदशभिःप्रयाजै
श्चरित्वाविरमेत्।तंचभेदात्॥तत्रवसिष्ठार्षेयंयजमानंप्रकृत्यप्रयोगउच्यते॥अध्वर्युणासमिधः
प्रेष्येत्युक्तोमैत्रावरुणः॥होतायक्षदग्निंसमिधासुषमिधासमिद्धंनाभापृथिव्याःसंगथेवाम
स्या।वर्ष्मंदिवइडस्पदेवेत्वाज्यस्यहोतर्यज।ततोहोता।भूर्भुवः।येयजामहेज्जुषस्वनःसमिधम ग्ने

© Dharmartha Trust J&K. Digitized by eGangotri

ग्नेऽश्वयशो वाचृ हव्यजातं क्षमसृ एवत्। उपस्पृशदिव्यं सानु स्तूपैः संरश्मिभिस्तततनः सूर्यस्या४ वौ४
षट्।ऽउजः।। सहः सहऽउजः स्वः।। ता। तोऽध्वर्युरुणा प्रेष्येत्तु क्रोमैत्रा·। होता यक्षन्नराशंसं नृशस्तं नृः प्रणेत्रं।।
गोभिर्वपावांस्याद्धूरैः शक्रीवावैः। प्रथमया वाहिरण्यैश्चन्द्रीवेत्वाज्यस्य होतर्यज।। ततो होता।।
भू·ये·हे नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रतवः शुचयो धियंधाः स्वदं
ति देवा उभयानि हव्या४ वौषट्।ऽउजः।। प्रेष्येत्तु क्रोमे·। होता यक्षदग्निमिल ईलितो देवो देवाँ आवक्ष
द्दूतो हव्यवालमूरः।। उपेमं यज्ञमुपेमां देवो देव[illegible]तिमवत्तु वेत्वाज्यस्य होतर्यज।। होता।। भू·ये·हई
ळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचं। मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेमा४
वौ४ ऽउजः·। प्रेष्येत्तु क्रोमे·। होता यक्षद्बर्हिः सुष्टरीमोर्णम्रदा अस्मिन्यज्ञे वि च प्र च प्रथतां स्वासस्थं
देवेभ्यः। एमेनदद्य वसवो रुद्रा आदित्याः सदन्तु प्रियमिन्द्रस्यास्तु वेत्वाज्यस्य होतर्यज। हो·भू·ये·

© Dharmartha Trust J&K. Digitized by eGangotri

स ६३

63

हैर्प्यर्थवोभरमाणाअभिज्ञुप्रष्ठुंजतेनमसावर्हिरग्नौ॥आज्जुह्वानाघृतपृष्ठंपृषद्वदध्वर्यवोहविषाम
र्जयध्वं।४वो।४।ऊर्जः।प्रेष्येत्तुक्तोमैत्रा०।होतायक्षद्दुरऋष्वाःकवष्योकोषधावनीरुदाताभिर्जिह
तांविपक्षोभिःश्रयंतां॥सुप्रायणाअस्मिन्यज्ञेविश्रयंतामृतावृधोअंत्वाज्यस्यहोतर्यज॥होता॥
नू०ये०हेस्वाध्योविदुरोदेवयंतोशिश्रयूरथयुर्देवताता॥प्रवीशिशुंनमातरारिहाणेसमग्रुवोन
ममनेष्वंजा।४न्वो।४।ऊर्ज०।५।प्रेष्येत्तुक्तोमै०।होतायक्षदुषासानक्ताबृहतीसुपेशसाषतिभ्योयोनिं न्हं:
कृएवाने।संस्मयमानेइंद्रेणदेवैरेदंवर्हिःसीदतांवीतामाज्यस्यहोतर्यज।हो०नू०येहृग्नतयोषणो
दिव्येमहीनउषासानक्तासुदुघेवधेनुः॥वर्हिषदापुरुहूतेमघोनीआयज्ञियेसुवितायश्रये
तां।४वो।४।ऊर्ज०।६।प्रेष्येत्तुक्तोमै०।होतायक्षद्दैव्याहोतारामंद्रापोतारावावीप्रचेतसा॥स्विष्टमद्या रा ए
न्यःकरदिषास्वभिहूर्त्तमन्यऊर्जासतवसेमंयज्ञंदिविदेवेषुधत्तांवीतामाज्यस्यहोतर्यज।होता॥ ह

© Dharmartha Trust J&K. Digitized by eGangotri

सू·ये·हे विश्वायज्ञेषुमानुषेषुकारूमन्येवांजातवेदसायजध्यै।ऊर्ध्वंनोअध्वरंकृतंहवेषुतादेवे
षुवनथोवार्याणि वौ ५।३ ज·।प्रेष्येत्सुक्षोमैत्रा·।होतायक्षत्तिस्रोदेवीरपसामपस्तमायत्नमाअछि
द्रमद्येदमपस्तन्वतां।देवेभ्योदेवीर्देवमपोऽयंत्वाज्यस्यहोतर्यज।हो·सू·ये·हआभारतीभारतीभिः
सजोषाइलादेवैर्मनुष्येभिरग्निः।सरस्वतीसारस्वतेभिरर्वाक्तिस्रोदेवीर्वर्हिरेदंसदंतु ५ वौ ५।३ ज·।
८।।प्रेष्येत्सुक्षोमै·।होतायक्षत्त्वष्टारमचिष्टुमपाकंरेतोधांविश्रवसंयशोधां।पुरुरूपमकाम
कर्शनंसुपोषःपोषैःस्यात्सुवीरोवीरैर्वेत्वाज्यस्यहोतर्यज।हो·सू·येहेतन्नस्तुरीपमद्यपोषयि
त्नुदेवत्वष्टर्विरराणःस्यस्व।यतोवीरःकर्मण्यःसुदक्षोयुक्तग्रावाजायतेदेवकामा ५ वौ ५।३
ज·।९।प्रेष्येत्सुक्षोमै·।होतायक्षद्वनस्पतिमुपावस्रक्षद्धियोजोष्टारंशशमंनरः स्वदात्स्वधि
तिर्भ्रान्तुथाघदेवोदेवेभ्योहव्यावाड्वेत्वाज्यस्यहोतर्यज।होता।सू·ये·हेवनस्पतेवसृजोपदेवा

© Dharmartha Trust J&K. Digitized by eGangotri

६५ नग्निर्हविः शमिता सूदयाति। सेदु होता सत्यतरो यजाति यथा देवानां जनि॥ मानि वेद॥ ५ वौ ५। ई जः।
१०। एतैर्दशभिः प्रयाजैश्चरित्वा पर्यग्नये त्रु ४ हीत्युक्तोऽग्निर्होता नो अध्वर इति तिसृभिरन्वाह मैत्राव
रुण एव त्रिः प्रथमां त्रिरुत्तमां। अग्निर्होता नो अध्वरे वाजी सन्परिणीयते॥ देवो देवेषु यज्ञियो३ अग्नि
र्होता यते। देवो यज्ञियो३ अग्निः नेदेवो यज्ञियो३ परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव। आ देवेषु प्रयो द
धो३ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्॥ दध इत्यानि दाशुषो३ परि वाज मीत्॥ दध शुषो३
परिमीत्॥ दध दाशुषो३म्॥ ततस्तु पशुं प्य होतर्हव्या देवेभ्य इत्युक्तो मैत्रावरुणो जेदग्निरित्युपप्रै
षसंज्ञकं प्रैषमाह॥ अजैदग्निरसनद्वाजं नि देवो देवेभ्यो हव्यावाट् प्रांजोभिर्हिन्वानो धेनाभिः कल्प
मानो यज्ञस्यायुः प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्यः। अस्मिन्प्रैष उक्तेऽघेर्गुं होता पठेत्॥ मैत्राव
रुणश्चेमं प्रैषं पठित्वा स्वदंडमंतर्वेदि निधायात्मआप्तोत्तानुवचनकालात्॥ अंतर्वेदिं दंडं नि

64

© Dharmartha Trust J&K. Digitized by eGangotri

दर्थ्यादित्याश्वलायनवचनात्। दैव्याः शमितार उत च मनुष्या आरभध्वमुपनयत मेध्या दुर आशासा
नामेधपतिभ्यां मेधं॥ प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्यो
ऽनु सखा सयूथ्यः। उदीचीनां अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयतात् वातं प्राणमन्ववसृजतादन्तरि
[illegible] क्षमसुं दिशः श्रोत्रं पृथिवीं शरीरं। एकधास्य त्वचमाछ्यतात्पुरा नाभ्या अपिशसो वपामुत्खिदतादं
तरेवोष्माणं वारयध्वात्। श्येनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोषणी कश्यपेवांसाछिद्रे
श्रोणी कवषोरू स्रेकपर्णाष्ठीवंता। षड्विंशतिरस्य वंक्रयस्ता अनुष्ठ्योच्यावयतात् गात्रं गात्रम
स्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्। अस्ना रक्षः संसृजतात्। वनिष्ठुमस्य मा राविष्टो
रूकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः। अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रि
गो३ अध्रिगो शमी· अध्रिगो३ अध्रिगो· मध्रिगो३ इति स्रुक्हस्तेनाध्वर्युणा नेतेनावसाययानुद्रुत्य सन्नेव उपांशु जप

© Dharmartha Trust J&K. Digitized by eGangotri

६५ 65

ति। उभावपापश्च इति। अत्र देव्याः शमितार इत्यारभ्य यविता रवच्छमिता रः इत्यंतं न वैवो च्चासाः कर्त्तव्याः। अ
त्र शमित्रामार्यमाणं पशुं न पश्येद्धोता॥ होता चक्षुर्यादनादिष्टमिति स्त्रात्॥ नेदस्य संज्ञप्यमानस्याध्वर्यु
श्च सामेति शतपथश्रुतेः तत्सर्वैर्न पश्येयुः॥ यदि पश्येत्तदा दृषदाज्यावेक्षणं प्रायश्चित्तं कुर्यात्। अग्नेो देवा
इदं विष्णुरित्यादिकां वा वैष्णवीमृचं जपेत्॥ ततो वपामादायाग्नेोपरि श्रपयंति॥ तस्मिन्नवधौ होकेभ्यो त्व
मृहीश्च तु ऋो मे त्रानतणों ऽतर्वेदिनिहितं स्वदंडमवष्टभ्य कुर्वत्राइ वितिष्ठन् जुषस्व सप्रथस्तममित्येका
मृचं इमं नो यज्ञमिति च यंच र्चे सूक्तमन्वाह। त्रिःप्रथमां त्रिरुत्तमामिति॥ जुषस्व सप्रथस्तमं वचो देवप्स
रस्तमं। हव्या जुह्वान आसनि। ३ जुषस्व॰ सामं॥ हव्या नो ३ जुषस्व॰ मं। हव्या॰ सनो ३ [illegible] इममग्नीयज्ञममृते
षु धेहीमा हव्या जातवेदो जुषस्व। लोकानाममग्ने मेदसो घृतस्य होतः प्राशान प्रथमो निषद्य। ३ घृतवंतः
पावक ते स्तोकाश्चोतंति मेदसः। स्वधर्मं देववीतये श्रेष्ठं नो धेहि वार्यं। ३ तुभ्यं स्तोका घृतश्चुतोऽग्ने वि

© Dharmartha Trust J&K. Digitized by eGangotri

प्रायसंत्या। ऋषिः श्रेष्ठः समिध्यसे यज्ञस्य प्राविता भवो ३ त्तुभ्यं श्चोतंत्यध्रिगो शचीवः स्तोकासो ऽ अ
ग्ने मेदसो घृतस्य। कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिरो ३ ऽ जिष्ठं ते मध्यतो मेद उद्भृतं प्र
ते वयं ददामहे। श्चोतंति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहो ३ ऽ जिष्ठं॰ महे। श्चोतं॰ विहो ३
ऽ जिष्ठं॰ महे। श्चोतं॰ विहो ३ म्। ततो वपामवधाय प्राणदानं कृत्वा प्रियेण धाम्नेत्यासादयति॥ अत्रांत
राले होतुः उत्तमप्रयाजार्थं स्रुगादापनं। अग्निर्होतावेत्वग्निः देवता। योग्निं॰ महद्याः। उ॰ घृतवती॰
यज्ञियान्। ततो धूर्वेण स्वाहाकृतिभिः प्रेष्येत्युक्तो मैत्रावरुण एकादशं प्रयाजप्रैषमाह॥ होता य
क्षदग्निं स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानां स्वाहा स्वाहाकृतीनां स्वाहा हव्यसूक्तीनां। स्वाहा
देवा आज्यपा जुषाणा अग्न आज्यस्य हविषो व्यंतु होतर्यज॥ ततो होता होतर्यजेति उक्त्वा आश्रीसू
क्तस्यामेकादशीं प्रयाजयाज्यामायात्वग्न इत्यादिकां पठेत्॥ भूर्भुवः॥ ये॰ह आयात्वग्ने समिधानो अ

© Dharmartha Trust J&K. Digitized by eGangotri

६६ वीडिः इडेण देवैः सरथं तुरेभिः। बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां ४ वौ ४ षड्रु
66 ज.। १५ इत उत्तरमावपा होमांतं होतृमैत्रावरुणयोर्वाग्यमनं॥ न स्वाहाकृतीस्त्रवपांतांतरेण वावंविस
र्जेतेति आनेः। यद्यपि विसृजेते स्पैकवचनेन होतुरेव वाग्यमः प्राप्नोति॥ तथाप्येकवचनमत्रा विव
क्षितं स्वाहाकृतिप्रैषसंबंधात्॥ तेनोभयोरपि वाग्यमनं॥ अत्र वपायामाज्यभागौ सहूंतौ सप्रैषौ क
र्त्तव्यौ। ननु तौ न पशौ न सोमे करोतीति निषेधात् कथमत्र तौ भविष्यत इति चेत्॥ न॥ यत्तु प्राधा
न्य एव निषेधात्॥ इह चातुर्मास्यानां तु ख्यत्वात् भविष्यत एव। अत्र तु शौज्ञानमपि। चातुर्मास्या
नां तु ख्यत्वात् सहृदाज्यभागयोर्वैराजे च स्विष्टकृति प्राप्ते यास्तु कः स्विष्टकृदिति। स्विष्टकृतं विद
ना धत आज्यभागावनुजानात्येव। अन्यथा न्यायतो इमसामान्यात् प्रवात्रि प्रावेव पुरोडाशे प्राप्नुतः। चा
तुर्मास्येपि सप्रैषौ न विरुध्यते॥ यथोक्तमविरुद्धमिति कात्यायनवचनात्॥ यथैव प्रस्तुतं बर्हिः बे

© Dharmartha Trust J&K. Digitized by eGangotri

प्रस्तरोवाप्रथमजगोरित्येवमादिकंधर्मजातंपशुधर्मान्ननविरुणाद्धि । एवंन्यायतःप्राप्तोसद्ध
दाज्यभागोसर्वेषावेवभवतः । ततोऽग्नयेनुब्रूहीत्युक्तोमैत्रावरुणस्त्वमग्नेसप्रथाइत्यनुवाक्या
माह ॥ ततोऽग्नयेप्रेष्येत्युक्तः । होतायक्षदग्निमाज्यस्यजुषतांहविर्होतर्यज । इतिप्रैषमाह । ततो
होताग्निमितिदेवतादेशपदस्थुष्टत्य·भूर्भुवःये·हेज्जुषाणोऽग्निराज्यस्यहविषोवेतुवौषडिति
याज्यांपठेत् ॥ एवमग्रेपिसर्वेष्वप्रदानेदेवतादेशपदोद्धारःकर्त्तव्यः । सर्वेष्वेतुनविघतइतिनि
षेधात् ॥ ततःसोमायानुब्रूहीत्युक्तेसोमयास्त्वइतिउपरोनुवाक्यामाह । ततःसोमायप्रेष्येत्युक्तो
होतायक्षत्सोममाज्यस्यजुषतांहविर्होतर्यजेतिप्रैषमाह ॥ ततोहोताभू·ये·हेज्जुषाणःसोम
आज्यस्यहविषोवेतु४वौषडितियाज्यांपठेत् ॥ ऽजं· । ततइंद्राग्निभ्यांछागस्यवपायैमेदसोनु
ब्रूहीत्युक्तोमैत्रावरुणउभावामिंद्राग्नीइतिउपरोनुवाक्यामाह । पश्चैकारश्चिन्यामैंद्राग्नपशुवि

© Dharmartha Trust J&K. Digitized by eGangotri

६७

67

पयेयाज्यानुरोधेनुवाक्यार्थं उभावामित्यादिकस्य षट्कस्य सूत्रे विधानात्॥ उभावामिंद्राग्नीआ
हुवध्या उभाराधसः सह मादयध्यै। उभा दातारा विषां रयीणामुभा वाजस्य सातये हुवे वां ३म्॥
ततोध्वर्युणेंद्राग्निभ्यां छागस्य वपां मेदः प्रेष्येत्युक्ते मैत्रावरुणः। होता यक्षदिंद्राग्नी छागस्य वपा
या मेदसो जुषेतां हविर्होतर्यज। होता। ऊं·ये·हे शु चिन्नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ४ वौ ४ षट्। ऊं ज०। इति याज्या। तदनंतरं हो
तृमैत्रावरुणौ यथायातं पूर्वो मैत्रावरुणः पश्चाद्धोतेत्येवं निष्क्रम्य चात्वाले गत्वा मार्जनमिदमा
प इति त्र्यचेन सह ऋग्भिस्त्रिभिरित्येवं तेन कृत्वा वाग्यमादेर्नियमात् द्वावप्युत्सृज्येते॥ मैत्रावरुणः कृ
दंडं निधाय मार्जनं कुर्यात्॥ कृतायां वपायां सब्रह्मकाश्चात्वाले मार्जयंते निधाय दंडं मैत्रावरु
ण इत्याश्वलायनवचनात्॥ चात्वाले मार्जयंते सपत्नीका इति कात्यायनवचनात् पत्न्या अपि

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्रेणमार्जनं।अथैंद्राग्नंपशुपुरोलाशंकुर्वंति॥तत्रऐंद्राग्नेपरांचिहवींषीतुकृत्वातत्ऐंद्राग्नेपस्य
पुरोलाशेवात्तुमांस्यदेवतानांअनान्तन्त्रानिहवींषिकुर्वंति॥ततःपुरोलाशपूर्वकंहविंष्यासादिते
सुच्यध्वर्युणाएतंहोतर्मैत्रावरुणावितिपशुपुरोलाशार्थमामंत्रितौहोतर्मैत्रावरुणौचात्वालो
त्कराववंतरेणपूर्ववत्प्रविश्ययथास्थानमुपविशतः।ततोध्वर्युर्वशात्यजत्येषावाज्यभागौवार्त्रघ्नौ॥
ततोध्वर्युणाइंद्राग्निभ्यांपुरोडाशस्यानुब्रूहीत्युक्तेपूर्वंमार्जनकालेस्थापितंदंडंपूर्ववदवष्टभ्यमै
त्रावरुणआवृत्रहणेतिपशुपुरोडाशस्यपुरोनुवाक्यामाह॥आवृत्रहणावृत्रहभिःशुष्मैरिंद्रया
तंनमोभिरग्नेअर्वाक्।युवंराधोभिरकवेभिरिंद्राग्नेअस्मेभवतमुत्तमेभिः।ततइंद्राग्निभ्यांपुरोडा
शंप्रेष्येत्युक्तोमैत्रा०।होतायक्षदिंद्राग्नीपुरोलाशस्यजुषेतांहविर्होतर्यज।होता।भूः।येहेगीभिर्वि
प्रः प्रमतिमिच्छमानईट्टेरयिंयशसंपूर्वभाजं।इंद्राग्नीवृत्रहणासुवज्राप्रनोनव्येभिस्तिरतंदेष्णैः

© Dharmartha Trust J&K. Digitized by eGangotri

६८ वैौषट्।ॐ नमः॥अथ चातुर्मास्यदेवतायज्ञैषाः।अग्निर्मूर्धाभुवोयज्ञस्येत्यग्नेः।इमंयज्ञंयातेधामा
निदिवीतिसोमस्य।हिरण्यपाणिमूतयउदीरयेतिसवितुः।पावकानःसरस्वतीमाज्वह्वानेतिसरस्वत्याः/
पूषंतवस्तुकंतइतिपूष्णः।इहेहवःस्वचित्रमर्कमितिमरुतांस्वतवसां।विश्वेदेवासस्तीर्णंवर्हिषीतिवि
श्वेषांदेवानां।महीद्योरुवीपृथ्वीइतिद्यावापृथिव्योः।इंद्राग्नीअवसागतंभ्यइतीन्द्राग्न्योः।इमंमेवरु
६ णतत्वायामीतिवरुणस्य।मरुतोय[illegible]पूयमस्मानितिमरुतां।हिरण्यगर्भोयःप्राणतइतिकस्य।अनीके
हीषोहृयाग्नेसेनानीकेनेत्यग्नेरनीकवतः।सांतपनायोनोमरुतइतिमरुतांसांतपनानां।गृहमेधास
आगतपत्रुक्ष्यावइतिमरुतांगृहमेधानां।क्रीलंवःपर्वतश्चिदितिमरुतांक्रीलिनां।उतत्वामदितेम
हिमहीमूषुमातरमित्यदित्याः॥महांइंद्रोयओजसामहांइंद्रोन्नृवदितिमहेंद्रस्य।वाचस्पतिंयातेधा
मानिपरमाणीतिविश्वकर्मणः।शुनासीराविमांशुनंनःफालाइतिशुनासीरयोःतववायवृतस्पते ए

© Dharmartha Trust J&K. Digitized by eGangotri

घृर्य्यवश्चक्रवांस इतिवायोः। तरणिर्विश्वदर्शतो दिवो रुक्म इति सूर्यस्य। उपांशुपदानां यथावद्देवप्र
योगः। ततो निर्गुणः स्विष्टकृद्यागः। तत्राध्वर्युर्वो यज प्रैषमेव कुर्वंति। तेषां स्विष्टकृद्यक्ष्या दिति
कात्यायनवचनात्। ततो वैराजः प्राप्नोति। तदिह यास्तुकः स्विष्टकृदिति वाचनिको विधिः। ननु पु
रोलाशस्विष्टकृत्समवायेपीति प्राप्त एव यास्तुकः स्विष्टकृत्। नेत्युच्यते॥ पशोर्गुणत्वे अन्वाया
तानां हविषामत्यंतगुणत्वेदेवस्य च इति पुरोलाशस्विष्टकृत् यास्तुक एव स्विष्टकृदित्यर्थः। अ
ध्वर्गुणामपि तन्नथैवञ्जातं॥ परं त्विह पशोर्गुणत्वे हविषां तु ख्यत्वे पि प्रेष्य प्रैषो न प्राप्नोति। त
दिह विधानादेव भविष्यति। तस्मात् यास्तुक एव। ततो अग्नये नु ब्रू ४ हीत्युक्ते मैत्रावरुणः पुरोडा
शः स्विष्टकृतः पुरोनुवाक्यामिलामग्न इत्याह। इ लीमग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय
साध। स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॐ॥ ततो ध्वर्गुणा ऽग्नये प्रेष्येत्युक्ते मैत्रा

© Dharmartha Trust J&K. Digitized by eGangotri

६९ वरुणः पुरोडाशस्विष्टकृतः प्रैषमाह॥ होता यक्षदग्निं पुरोडाशस्य जुषतां हविर्होतर्यज। होता। जूल्ये·
69 हेग्निं ह्रुक्षीतिं ह्रुद्दर्शं शूरणं तो नमस्याम हव्येग्रं जातवेदः। त्वां दूतमरतिं हव्यवाहं देवा अकृण्वन्नमृत
ना स्यभी ४ वौ ४ षट्। ऊँ ज। उदकोपः॥ न निगमाः संति यस्तुतं त्रे चोद्यमानानामिति परिभाषितत्वात् अ
न्वायात सहितस्य स्विष्टकृतो निगदस्य प्रतिषेधः। ततश्चाध्वर्यवं संचरास्रुक्क्रुणादि। ततः प्रवरांजनादि
मार्जनांतं प्रकृतिवत्॥ मैत्रावरुणस्य त्वारंभइला भक्षं भवति। प्रतिप्रस्थाता वी। ततो दक्षिणा
मानयंत्यध्वर्यवः अभिमर्शनमध्वर्योरेव भवति। ततो हः प्रजापतेर्भागाः स्थोर्जस्वंतः पयस्वंतः प्रा
णापानौ मे पात समानव्यानौ मे पातोदानव्यानौ मे पात प्रथमजवत्स मिथुनगवर्षभश्वेताश्वाजाः
स्थोर्जं मयि धत्ता क्षितयस्थ मा मे क्षेध्वमत्रामुष्मिं लोक इह च। संकल्प्यः अमीषांऐकाहिकानां रा
पासुकानां चातुर्मास्यानां सह प्रथमजवत्स मिथुनगवर्षभश्वेताश्वाजदक्षिणा ब्रह्मणो हो द

© Dharmartha Trust J&K. Digitized by eGangotri

त्रेध्वर्यवे मैत्रावरुणाय प्रतिप्रस्थात्रे ग्नीध्रे च सम विभागेनाहं संप्रददे॥ यो यो विभागः मयापि
दत्तस्त्रिवारं॥ रुद्राय त्वा॥ यमाय त्वा॥ प्रजापतये त्वा॥ इति मंत्रं कोदादित्यन्तु मंत्रणं। एवं स
र्वेषां। अस्मज्ञाता। दर्विहोमः॥ अथ भो ध्वर्यवे भवति॥ ततउत्था संस्थापनाध्वर्यवं। ततः पूर्व
न्यायेन दक्षिणा दानांते पिप्रा। सा च सकलापि परिकल्पिता। ततश्चैव का। अथ पन्नु प्रचारः।
आचम्य संवरेत्र विश्य होतृ मैत्रावरुणौ यथास्थानमुपविशतः। ततोऽवदानभागं कुर्वंत्य
ध्वर्यवः। तत्र मनोतायै हविषोवदीयमानस्यानुब्रूहीत्युक्तो मैत्रावरुणस्त्वं ह्यग्ने प्रथमो म
नोतेति त्रयोदशर्चं मनोतासूक्तमन्वाह त्रिः प्रथमां त्रिरुत्तमां। त्वं ह्यग्ने प्रथमो मनोतास्याधि
यो अग्ने भवो दस्म होता। त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्या ३ त्वं ह्यग्ने होता।
त्वं सीं सहध्या ३ त्वं ह्यग्ने होता। त्वं सीं सहध्या ३ अधा होतान्यसीदो यजीयानिलस्पद इषयन्नी

© Dharmartha Trust J&K. Digitized by eGangotri

७० उ्रः सन्॥ तंत्वा नरः प्रथमं देवयंतो महो राये चितयंतो अनुग्मो३ ऋते वयंतवक्रभिर्वसव्यैस्त्वे रयिं

70 जागृवांसो अनुग्मन्॥ तमग्निं दर्शतं बृहंतं वपावंतं विश्वहा दीदिवांसो३ पदं देवस्य नमसा व्यंतः श्र

वस्यवः श्रव आपन्नमृक्तं। नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयंत संदृष्टो३ त्वां वर्द्धंति क्षितयः

पृथिव्यां त्वां राय उभयासो जनानां। त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणो३ सपर्ये

एण्यः स प्रियो विक्ष्वग्निर्होता मंद्रो निषसादा यजीयान्॥ तं त्वा वयं दम आदीदिवांसमुप ज्ञुबाधो नमसा

सदेम॥३ तं त्वा वयं सुध्यो नव्यमग्ने सुम्नायव ईमहे देवयंतः। त्वं विशो अनयो दीद्यानो दिवो अग्ने बृह

ता रोचनेन॥३ विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनां। प्रेतीषणिमिषयंतं पाव

कं राजंतमग्निं यजतं रयीणो३ सो अग्न ईजे शशमे च मर्त्तो यस्त आनट् समिधा हव्यदातिं। य आहु

तिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतो३ अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत

राम ७०

© Dharmartha Trust J&K. Digitized by eGangotri

हृव्यैः वेदीसन्नोसहृसोगीर्भिरुत्स्थैरातेभद्रायांसुमतौयतेमो३आयसन्नंतथरोदसीविभासाश्रवोभि
श्रुश्रवस्यन्तरुत्रः। स्तुहिद्विवीजेस्त्वद्विरिभिरस्मेरेवद्भिरग्नेवितरंविभाहो३न्नेवद्सोसदमिश्रेत्यस्मेसूरि
तोकायतनयायपश्वः। सूर्वीरिषोवृहृतीरारेअघाअस्मेभद्रासौश्रवसानिसंतो३पुरूणपग्नेपुरुधात्वा
यावसः निराजनूवसुतानेअश्यां। पुरूणिहित्वेपुरुवारसंत्यग्नेवसुविधतेराजनित्वो३पुरूणपग्न्य
श्यां। पुरूः नित्वो३पुरूणपग्नेअश्यां। पुरूणि नित्वो३। ततो वपुंगणाइंद्राग्निभ्यांछागस्यहविषोनुब्रू४
हीत्युक्तोमैत्रावरुणः प्रवर्षणिभ्यः पृतनाहवेष्वितिपुरोनुवाक्यामाह। तत इंद्राग्निभ्यांछागस्यहविः
प्रेष्येत्युक्तः पशोः प्रैषमाह॥ होतायक्षदिंद्राग्नीछागस्यहविषआत्तामद्यमध्यतोमेदउद्भृतंपुराद्वेषो
भ्यः पुरापौरुषेय्यागृभः॥ घस्तांनूनंघासेअज्राणांयवसप्रथमानांसुमत्क्षराणांशतरुद्रियाणाम
ग्निष्वात्तानांपीवोपवसनानां। पार्श्वतः श्रोणितः शितामतउत्सादतोऽगादंगादवत्तानांकरतएवेंद्राग्नी

© Dharmartha Trust J&K. Digitized by eGangotri

७२ जुषेतां हविर्होतर्यज। ततो होता ता यो विष्टमिति यशो याज्यामाह। ह्नू॰ये॰होता यो विष्टमभिगा इंद्र
नूनमपः स्वरुषसो अग्न ऊळ्हाः अत्र याज्यार्द्धे विरामश्चावसा होमात्॥ वसाशब्देन पशुश्रपणार्थं
निक्षिप्तस्तु खामांडस्थं जलमुच्यते। तस्मिन्नकृते न रमर्द्धे यठेत्॥ दिशः स्वरुषस इंद्र चित्रा अपो
गा अग्ने युवसो नियुत्वा ॥चौ॥षट्॥ उजः। इति याज्या॥ अत्र इंद्राग्नी अवसाप्रवर्षेति म्पद् इति युगलस्य
वारुणप्रधासिके कृतत्वात् यातयामत्वदोषनिराकरणार्थं याज्यानुवाक्ययोंता यो विष्टं प्रवर्षेति
म्पद् इत्पन योः विपर्यासः कृतः। ततो वनस्पतये ॥ह्नीतु क्रो मैत्रा॰। देवेभ्यो वनस्पते हवींषि हिरण्य
पर्णप्रदिवस्ते अर्थं॥ प्रदक्षिणिद् रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः उस्॥ वनस्पतये त्रे
ष्येत्सु क्रो मैत्रा॰। होता यक्षद्वनस्पतिमभिहिपिष्टतमया रभिष्ठया रशनया धित। यत्रेंद्राग्नोः स्छा
गस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्ने राम ७२

मा १

© Dharmartha Trust J&K. Digitized by eGangotri

र्होतुः प्रियाधामानि। तद्वैतं प्रस्तात्स्वेवोपस्तात्स्वेवोयावसृज्य भूयांसमिव कृत्वा वीकारदेवं देवो वनस्प
तिर्जुषतां हविर्होतर्यज॥ अत्र मैत्रेयैराश्वलायनानामाज्यभागयोर्निगमनमस्ति। यत्राग्नेराज्यस्य
हविष इत्यादि। अस्माकं त्वाज्यभागयोर्निगमनं मैत्रेयेषु न भवति। दर्शपौर्णमासिका निगमास्तेषु
निगच्छत इत्युक्त्वा न मैत्रेयेष्विति निषिद्धत्वात्। होता। ॐ ये३ हे वनस्पते रशनया निधूय पिष्टतमया
वयुनानि विद्वान्॥ वह देवत्रा दिधिषो हवींषि प्र च दातारममृतेषु वोचा४ वौ४षट्॥ ईजः। ततोऽ
ग्नये स्विष्टकृते तु अ४ हीनुक्रो मैत्रावरुणः पशु स्विष्टकृतः पुरोनुवाक्यामाह। पिप्रीहि देवाँ उ
ह। ये दैव्या यज्ञिष्ठो३म्॥ ततोऽग्नये स्विष्टकृते प्रेष्यनुक्रो मैत्रा। होता यक्षदग्निं स्विष्टकृतमयाल
ग्निरिंद्रस्याग्नीः छागस्य हविषः प्रिया धामान्ययाड्वनस्पतेः प्रिया पाथांस्ययाड्देवानामाज्यपानां प्रिया
धामानि यक्षदग्नेर्होतुः प्रिया धामानि॥ यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा

© Dharmartha Trust J&K. Digitized by eGangotri

७२ जातवेदा जुषतां हविर्होतर्यज। होता। स्व·ये·हे·मेयदद्य विशो·यज्वा। जातायजामि·अथ्याष्ट वौषट्
उंजः॥ अनिगदायाज्येति वचनादग्निं स्विष्टकृतमित्यादिकः प्राकृतो निगदोऽत्र न भवति। उदको
72 पः। ततः पश्चिलोपकानं होतुः। प्रवरांजनादिमार्जनांतं प्रकृतिवत्। अध्वर्युविकारात्। अस्यानाभ
क्षेषु मैत्रावरुणस्य होत्रध्वर्युविकारादिति कात्यायनवचनादत्र मैत्रावरुणप्रतिप्रस्थात्रोरपीला
भक्षणं केचिदिच्छंति। तत उल्मुकसमासाद्याधर्यं। समिद्व्रुमंत्रणे एतेवामग्नीद्रत्याद्यूहः। तत ए
कादशानुयाजाः॥ तत्र देवेभ्यः प्रेष्येत्यध्वर्युणा प्रेषितोनुप्रैषं देवं बर्हिरित्यादिकानेकादशानुया
जप्रैषाननवानमाह मैत्रावरुणः होता च देवं बर्हिरित्यादिकांश्चाह मासो त्राया ज्याः पठेत्॥ तत्राष्टम
नवमयोर्मध्ये देवो वनस्पतिर्देवं बर्हिर्वारितीनामिति द्वे याज्ये आगंतुं पठेत्॥ न वचाह मासोत्राः। ए
वमेकादशानुयाजयाज्या अनुप्रैषं होता पठेत्॥ मैत्रावरुणः॥ देवं बर्हिः सुदेवं देवैः स्यात्सुवीरं वीरैर्व ता मः ७

ता ९

© Dharmartha Trust J&K. Digitized by eGangotri

स्तोर्दुर्य्येता कोः चश्निये तात्पन्यान्नायावर्हिष्मतो मदेमन स्त्वबनेवस्त्वधेयस्यवेत्वयज। होता। भूः देवंवर्हि

र्वस्त्ववनेवस्त्वधेयस्यवेत्व४वोषट्। ३जः॥१॥ ततः पुनः प्रेषितो मैत्रा॥ देवार्द्धारः संघाते वीड्वीर्यामञ्छ्रि्थ

राश्रवादेवहूतौवत्स ई मेना स्तरुण आमिमी याः कुमारो वानवजातो मै अर्वा रेणुककाट ऋणन्वस्त्व ना

वनेवस्त्वधेयस्यव्यंत्वयज। होता। भूः देवीर्द्धारो वस्त्ववनेवस्त्वधेयस्यव्यंत्व४वो४षट्॥ ३जः॥ प्रेष्येत्वक्रो

मैत्रा०॥ देवीउषासानक्ताद्यास्मिन्यज्ञे प्रयत्यन्द्धेतामपि नूनं देवी विशः प्रायासिष्टां सुप्रीतेसुधितेवस्त्व

वनेवस्त्वधेयस्यवीतीयज। होता॥ भूः देवीउषासानक्तावस्त्ववनेवस्त्वधेयस्यवीतां४वो४षट्। ३जः। ३ प्रे

ष्येत्वक्रो मैत्रा॰ देवीजोष्ट्रीवस्त्वधितीययोरन्याद्याद्वेषांसि यूयवदान्यावक्षद्वसुवार्याणि यजमानाय

वस्त्ववनेवस्त्वधेयस्यवीतांयज। होता॥ भूः देवी जोष्ट्री वस्त्ववनेवस्त्वधेयस्यवीतां४वो४षट्। ३जः।४।

प्रेष्येत्वक्रो मैत्राः देवीऊर्जाहुती इषमूर्जमन्यावक्षत्सग्धिंसपीतिमन्यानवेनपूर्वंदयमानाः स्याम

© Dharmartha Trust J&K. Digitized by eGangotri

७३ पुराणो न नवं तान्नूर्जं मूर्जा हुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज। होता। भूः। देवी ऊर्जाहु
ती वसुवने वसुधेयस्य वीतां ४ वौ ४ षट्। ऽजः। ५। प्रेष्येत्तु क्रो मैत्रा। देवा दैव्यासेतारा पोतारा नेष्टारा हृताघ
शंसावाभरद्वसू वसुवने वसुधेयस्य वीतां यज। होता। भूः। देवा दैव्या होतारा वसुवने वसुधेयस्य वीतां
४ वौ ४ षट्।। ऽजः। ६। प्रेष्येत्तु क्रो मैत्रा। देवीस्तिस्रस्तिस्रो देवीरिला सरस्वती भारती द्यां भारत्यादित्यै र
स्पृक्षत्सरस्वती मं रुद्रैर्यज्ञमावीदिहैवेलया वसुमत्या सधमादं मदेम वसुवने वसुधेयस्य व्यंतु यज।
होता। भूः। देवीस्तिस्रस्तिस्रो देवीर्वसुवने वसुधेयस्य व्यंतु ४ वौ ४ षट् ४।। ऽजः। ७। प्रेष्येत्तु क्रो मैत्रा न
देवो नराशंसस्त्रिशीर्षा बलभुः शतमिदेनं शितिपृष्ठा आदधति सहस्रमीं प्रवहंति मित्रावरुणेदस्य
होत्रमर्हतो बृहस्पति स्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज। होता। भूः। देवो नराशंसो व
सुवने वसुधेयस्य वेतु ४ वौ ४ षट्। ऽजः। ८। प्रेष्येत्तु क्रो मैत्रावरुणः। देवो वनस्पतिर्वर्षप्रावा घृतनि

© Dharmartha Trust J&K. Digitized by eGangotri

रिग्धामभ्रेणास्मत्रुद्दांग्ररिक्षंमध्येनाप्राःपृथिवीमुपरेणादृंहीर्वसुवनेवसुधेयस्यवेतुयज।होता।भू
।देवीवनस्पतिर्वसुवनेवसुधेयस्यवेतु४वौ४षट्।ऽजः।९॥प्रेष्येत्तुन्त्रोमैत्रा०।देवंबर्हिर्वारितीनांनि
धेधासिप्रच्युतीनामप्रच्युतंनिकामधरणंपुरुस्पार्हंयशस्विदेनावर्हिषान्यावर्हींष्यभिष्यामवसुव
नेवसुधेयस्यवेतुयज।होता।भू०।देवंबर्हिर्वारितीनांवसुवनेवसुधेयस्यवेतु४वौ४षट्।ऽजः।१०
प्रेष्येत्तुन्त्रोमैत्रा०।देवोअग्निःस्विष्टकृत्सुद्रविणामन्द्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजी
यानग्नेयांदेवानयाडयांअपिप्रेयेतेसेवेअमत्सततासससत्तुषीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरये
मंस्विष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्यनमोवाकेवीहियज।होता।भू०।देवोअग्निःस्विष्टकृत्सु
द्रविणामन्द्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीयानग्नेयांदेवानयाडयांअपिप्रेयेतेहोत्रे
अमत्सततांससत्तुषीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमंस्विष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेय

© Dharmartha Trust J&K. Digitized by eGangotri

७५ 74
स्य नमोवाके वीहीं ४ वो ४ षट् ॥ ऽजः ॥ १ ॥ उदकोयस्पर्शनं । इत्येकादशानुयाजाः । ततोध्वर्युणास्त्क्षाग्रे
ष्वेत्तुक्तो मैत्रावरुणः । अग्निमद्यहोतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोलाशं वध्नन्निंद्राग्नि
भ्यां छागं ॥ सूपस्था अद्य देवो वनस्पतिरभवदिंद्राग्निभ्यां छागेन ॥ अघत्तां तं मेदस्तः प्रतिपचताग्र
भीष्टामवीवृधेतां पुरोलाशेन । त्वामद्य ऋषय आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य
आसंगतेभ्यः । एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्वा च
गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि । अत्र पचन्पुरोला
शानि न्यूहोन भवति ॥ अतुल्या नाम न्यूहेनेति परिभाषितत्वात् ॥ प्रैषं समाप्याहवनीये दंडमनुप्र
हरेत् ॥ समाप्य प्रैषमग्नौ दंडमनुप्रहरेः दित्याश्वलायनसूत्रात् ॥ ततो होता इंद्याद्यावापृथिवीत्या
दितयोरा विदीरस्यं तं पठित्वा । अग्निरिद हविरजुषतावीवृधत महोज्यायोऽकृत । सोमो हविरजुषतावीवृधत महोज्यायोऽकृत । इंद्राग्नी हविरजुषेतामवीवृधेतां महोज्यायोऽक्राताम् । वन राम ७५

स्यति ई विरःकृता देवा आज्यपा इत्यादि। अग्निर्होत्रेणाह विरःकृता। वाजिनो देवा हविर्जोषयिष्यंते वईयि
ष्यंते महोज्यायःकरिष्यंते॥ अस्यामृधदित्यादि नमउपेत्यंतं। ततो वाजिनयागो यथोक्तः॥ उपहूत भक्षो
न मैत्रावरुणस्य॥ प्रतिप्रस्थातुर्वा। ततः शंयोर्वाकादि। ततः [illegible]पत्नीसंयाजादि आहवनीयोपस्था
नांतं समानं। तत्राध्वर्यूणामदृष्टाकुत्वभावात् शंयोर्वाको न भवतीति केचित्। भवतीत्याह्निकाः।
ततः शंयोर्वाके होता पठति मैत्रावरुणो यथाप्रयत्नं चात्वालोत्करावंतरेण निष्क्रम्य वाग्यमादिति यमा
दुत्सृज्यते॥ अत्राध्वर्योरेव वेदस्य सारणाहूर्वे वत्॥ ततो ध्रुवाप्यायनं। ततः स्रुचौ तिस समिष्टयजूंषि। स
मिष्टयजुरंते अवभृथेष्टिं कर्तुं यांति। सा च उत्तं हि राजेत्यतत् प्रारभ्य तुषकरीं पत्नीगार्हपत्य इत्यंतं सासका
लापिकाल्पितानां ततः आगत्य यथास्थानं प्रविष्टाः बर्हिर्होमादि तंत्रं समापयंति। ततो हृदयशूलसंस्
कस्य काष्ठविशेषस्योपस्थानं॥ तत्राध्वर्यु दयोर्हृदयशूलमादाय तडागायुदकं गच्छंति तदाने स्रुस

© Dharmartha Trust J&K. Digitized by eGangotri

७५ हृसंगंतव्यं। स्वायंत्वनुद्याप्तं निषिञ्चत्पूर्वेण शूपं यथोक्तस्तुपस्पृहतीति कात्यायनवचनात्‌ यद्यप्युर्ध्वः पूर्वे
75 ण शूपं हृदयशूलं शूलोऽग्रवेशयतितदा तं चैवस्थित्वा हृदयशूलस्तुपस्थेयं। उभयपक्षेऽपि मापो मोष
धीर्हिंसीः शुगसि यं द्विष्मस्तं तेस्तु शृच्छतु धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च यमापो अघ्न्या इति वरु
णेति शपामहे ततो वरुण नो मुञ्च। इत्यनेन मन्त्रेण हृदयशूलस्तुपस्थेयः। ॐ सुमित्रिया न आप ओ
षधयः सन्त्वित्यनेन मन्त्रेणाप्सु पशूलगता अप उपस्पृश्य। ॐ दुर्मित्रिया। स्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च
वयं द्विष्म इत्यनेन मन्त्रेण दक्षिणस्यां दिश्यपस्त्वाः क्षिपेत्‌ इति पस्तु कर्तारः। अथ त्यागाः। सूपाहुतौ।
इदं विष्णवे। स्थाण्वाहुतौ। इदं वनस्पतये। षड्ढोताराहुतौ इदं वाचस्पतये। अग्निप्रणयने हिरण्या
हुतौ इदं सिंह्यै। इदं सिंह्या आदित्यवन्यै। इदं सिंह्यै ब्रह्मवन्यै क्षत्रवन्यै। इदं सिंह्यै सुप्रजा
वन्यै रायस्पोषवन्यै। इदं सिंह्यै। अग्निमन्थने। इदमग्निभ्यां। अवहत्यागः। इदं प्रजापतये। इद राम ७५

© Dharmartha Trust J&K. Digitized by eGangotri

मिंद्राय इदं प्रजापतये। कारंभयाजहोमत्यागः। इदं मरुद्भ्यः। प्रयाजत्यागाः। इदं समिद्भ्यः। एको मम मे
त्यादि। इदं तनूनपाते। नराशंसाय वा। द्वौ मम मेत्यादि। इदमिड्भ्यः। त्रयो मम मेत्यादि। इदं बर्हिषे। चत्वा
रो मम मेत्यादि। इदं द्वार्भ्यः। पंच मम मेत्यादि। अग्निर्वारोहेयासमित्यंतमतःपरं तेत्र। इदमुषासानक्ताभ्यां।
पंच। इदं दैव्याभ्यां होतृभ्यां। पंच। इदं तिसृभ्यो देवीभ्यः। पंच। इदं त्वष्ट्रे। पंच। इदं वनस्पतये॥
पंच। इदमग्नये सोमायेंद्राग्निभ्यां वनस्पतये देवेभ्य आज्यपेभ्य स्वाहा हाजिभ्यः। पंच। आज्य
भागौ इदमग्नये। इदं सोमाय। परिपशव्याहुत्योः। इदं स्वाहा देवेभ्यः। इदं देवेभ्यः। वपापुरोडाशयोः।
इदम् मिंद्राग्निभ्यां। पशुपुरोडाशमनु चातुर्मास्यदेवतात्यागाः अकृतिवत्। ० वसाहोमे। ईमंत द
रिक्षाय। अवदानहोमे। इदमिंद्राग्निभ्यां। इदं वनस्पतये। पुरोडाशस्विष्टकृति। इदमग्नये। पशु
स्विष्टकृति॥ इदमग्नये स्विष्टकृते। अथानुयाजोपयहोमत्यागाः। इदं बर्हिषे। इदं समुद्राय। २। इदं

© Dharmartha Trust J&K. Digitized by eGangotri

७६ देवीभ्यो होर्भ्यः ॥ इदमंतरिक्षाय ॥ २ ॥ इदं देवीभ्यामुषासानक्ताभ्यां । इदं देवाय सवित्रे । ३ । इदं देवीभ्यां जोष्ट्री
76 भ्यां । इदं मित्रावरुणाभ्यां । ४ । इदं देवीभ्यामूर्जाहुतीभ्यां ॥ इदमहोरात्राभ्यां । इदं देवाभ्यां दैव्याभ्यां होतृभ्यां ॥
इदं छंदोभ्यः । ६ । इदं देवीभ्यस्तिसृभ्यः स्तिसृभ्यो देवीभ्यः ॥ इदं द्यावापृथिवीभ्यां । ७ ॥ इदं देवाय नराशंसा
य । इदं यज्ञाय । ८ इदं देवाय वनस्पतये । इदं सोमाय । ९ ॥ इदं देवाय बर्हिषे वारितीनां इदं दिव्याय नभसे । १०
इदं देवायाग्नये स्विष्टकृते । इदमग्नये वैश्वानराय । ११ । स्वरुहोमे । इदं स्वरवे । अथ व्यूहनं । तत्र । इंद्राग्नी
र्वनस्पतेरुद्गिति । इंद्राग्नी वनस्पतिस्त्वमपत्तु दंतु । नत्विष्टदेवतासंकीर्त्तनं नाम व्यूहनं ॥ तदत्र । इष्टा
नां चातुर्मास्यदेवतानां संकीर्त्तनेन भवितव्यं । तदिह नेति । किमिति चेत् । न । व्यूहनस्येष्टदेवतासंकीर्त्त
नरूपत्वेपि निगमस्थानभाजामेव संकीर्त्तनं युक्तं । यतो देशनव्यूहनादेस्तानि निगमस्थानसंज्ञा । स्वा राम
वाहनत्वमे प्रयाजे स्विष्टकृन्निगदे सूक्तवाके चेज्यमाना देवता निगच्छंति तस्मान्निगमस्थानानीति ७६

© Dharmartha Trust J&K. Digitized by eGangotri

महत्त्वारंभात्। सपशुपुरोडाशमहूर्वां हविषां निगमस्थानभाक्त्वाभावात्॥ अतएवमूहनादिष्वपि
देवयाज्ञिकैस्तयांस्तुत्वोद्देश्ययोस्तद्देवविधानात्। तथाच निगमस्थाने पुत्रसादेवतोपलक्ष्यत
इत्यस्मिन्नृतत्वेचोदितदेवतापदस्य यथावन्निगमस्थानोपलक्षणायांमूहनादिष्वपि निगमस्था
नत्वेपितद्देवप्रयोगस्थापनात्। किंच इष्टदेवतासंकीर्त्तनंमूहनंयदुच्यते तदपिन साक्षाददृ
ष्टार्थं। मूहनंनामप्रेरणं कर्म। तच्चस्वक्रतुनिष्ठं। तत्संपन्नौ च मंत्रोच्चारणमात्मार्थं॥ आशीर्योगात्
अतएवयजमानानेकत्वेसर्वेषामपि। समंत्रत्वाव दिष्टदेवतासंकीर्त्तनरूपः॥ इष्टदेवतासंकीर्त्त
नंचयदन्वायातानि चातुर्मास्यहवींषितत्प्रधानसंकीर्त्तनेनापिभवति। ननुमूहनमंत्रस्यात्मार्थ
त्वेपिकर्मणःस्वक्रतुसंस्कारत्वात् उत्तरवेदिस्वक्रतुसंस्कारेपिदक्षिणावेदौतदभावात्सर्वसंकीर्त्तने
नभवितव्यमितिचेत्। न। स्वक्रतुसंस्कारत्वाभात्। एकस्यैवस्वपरार्थत्वेविरोधात्॥ कर्मणःस्वक्र

© Dharmartha Trust J&K. Digitized by eGangotri

७७ संस्कारत्वं मंत्रस्यात्मार्थत्वमिति चेत्। न। मंत्रेणैव कर्मसंपत्तेः। मंत्रवृत्तु विना मंत्रं कर्मोत्पत्तेरभावात्
क्वचित् मंत्रं तेन कर्मणः संनिपातनात्। क्वचित्पदक्रमानेन मंत्रेणैव कर्मणः संनिपातनात्॥ किं
च स्रुक्संस्कारत्वे गृहमेधीयादौ व्यूहनाभावात् उपयुक्तानां स्रुक्संस्काराभावात् वैगुण्यमेव स्यात्॥
ननु तत्र व्यूहनं नेति को वा ब्रूते। तेषु अनुयाजयागाभावात् अनुयाजयागव्यूहनयोः परस्परं नैयत्यस्य
सूचितत्वात्॥ ननु गृहमेधीयादिषु आत्मसंस्काराभाववत् स्रुक्संस्काराभाव एवास्तु न। आत्मसं
स्कारस्य सांतपनीयायां कृततत्वात्॥ स्रुक्संस्कारोपि तत्र कृत इति चेत्॥ कृतेपि पुनरुपयोगं तदंग
तत्संस्कारस्य पुनरप्यवश्यकर्तव्यत्वात्॥ यथा पशौ प्रयाजादौ स्वगादापने कृते पुनर्विलंबेनोत्तम
प्रयादौ तदंगं स्वगादापनं क्रियत एव॥ परार्थत्वात्॥ परंत्वात्मार्थानां तंत्रांतःपातिकर्मणि पुन
विलंबेनाकरणमेव। यथा गृहमेधीयायां व्रतग्रहणं पित्र्यायां वा न क्रियते आत्मार्थत्वादेवा तस्मा राम ७७

ऊहनमात्मसंस्कारएव।आत्मसंस्कारत्वात्॥उक्तंवेदोतस्मिन्नूहनेदक्षिणावेदावनुपयोगात्॥अथ
येषांस्रुक्संस्कारएवऊहनंगृहमेधीयातिथ्यादौसर्वत्रभवतितेषांचसकलमपिऊहनंभवति।त
थाचकात्यायनामन्यंते।तेषामित्थं।इंद्राग्नीवनस्पतेरग्नेःसोमस्येत्यादिस्तूयस्योज्झितिः।इंद्राग्नीव
नस्पतिरग्निःसोमइत्यादिस्तूयंसमयंतुदंडं।तेषांयागस्रुक्क्रमेपि।सोमेऊहनेयागस्रुक्क्रमेणतथैव
दंडकपाठात्॥अस्माकंचसोमेपिसवनदेवतानांनिगमस्थानभाक्त्वंचेत्तदाऊहनभाक्त्वमपि
स्यात्।तच्चसूक्तवाकेभाक्तेभवति।आवाहनस्यपठितत्वाद्देवतत्त्वमप्रयाजस्विष्टकृन्निगदयोः
पत्नीवद्धोपएव।निगच्छंतिसूक्तवाकेवेति।विकल्पात्सूक्तवाकनिगमपक्षेकात्यायनानामिवऊ
हनं।स्वस्यासंभवेशाखांतरदृष्टस्यकल्पनस्योपादेयत्वात्॥सूक्तवाकेनिगमस्थानाभावेपत्नीदे
वताऊहनमेव।अथवापत्नीमन्त्रशाखांतराभिप्रायेणयथोक्तंऊहनंनविरुध्यते।तथापिक्लांतं

© Dharmartha Trust J&K. Digitized by eGangotri

७८ नदीक्षाय। अथ सूक्तवाके। इदमग्नये सोमायेंद्राग्निभ्यां वनस्पतये देवेभ्य आज्यपेभ्योऽग्नये होत्राय वाजि
भ्यः। वाजित्यागाः प्राकृताः। अन्ये सर्वे त्यागाः प्रकृतिवत्। वारुणीत्यागा अपि कल्पिता एव। तदनंतरं वृ
णीपात्रविमोके कृते दिगभ्युक्षणादि भागप्राशनांतं। ततो वपनं। स्नात्वा ततो यजमानो वेदिं निविशेत्। त
तो ब्राह्मणान् तर्पयितव्या वितिशेषः प्रयोगः॥ अमीषां पशुकानां ऐकाहिकानां चातुर्मास्यानां समृध्य
र्थं यथासंपन्नेनान्नेन तन्निपर्यंतेन भोजनेन द्वौ ब्राह्मणा वहं तर्पयिष्ये। ततो द्विचतुःशतब्राह्मणसंक
ल्प इति केचित्। शतद्वयमपि वा। शतस्य चातुर्मास्यनिमित्तत्वात्। शतस्य च पशुनिमित्तत्वात्॥ च
तुःशती चेत् पशुनिमित्तं शतं कर्त्तव्यमेव। दक्षिणा वहुभयपक्षस्य न्याय्यत्वात्। संप्रदाये चतुःशती।
ततः स हैष यज्ञ इत्यादि। त्रयो वै यज्ञ इति। अन्नतदानं॥ मंत्राशार्वचनं। हरिदानं। अथात्र ब्रह्मत्व
मपि लिख्यते॥ उदवसाय मंथनेत् स्त्रीमासनसंस्कारः। वरणे समंत्रकः। कारंभपात्रकरणोत्स्त्री। राम ७८

© Dharmartha Trust J&K. Digitized by eGangotri

यूपाकृतौतूष्णीं। स्थाराखाकृतौतूष्णीं। षड्होताराकृतौतूष्णीं॥ षड्वासादनेसमंत्रकः। वेदिमानद्वयेस
मंत्रकः। स्तंबयजुर्हरणेतूष्णीं। इध्मप्रणयनादौसमंत्रकः। गत्वाहवनीयसमीपेवा। पशुपुरो
डाशश्रपणेतूष्णीं। पशुपुरोडाशप्रचारेसमंत्रकः। पिष्टादौवसमंत्रकः। हविःप्रचारेप्राकृतैः
समंत्रकः। अंबवादौतूष्णीं। आरब्धकरणेतूष्णीं। पशुप्रचारादौसमंत्रकः॥ अंतेयथोक्ताहाकृ
तौतूष्णीं। अवहथअासनसंस्कारोनभवति। परियहीष्यावइत्यत्र। उंइतिगृहीतमितिप्रसवः॥
ग्रीकृष्यावइत्यत्र। उंग्रीकृतमितिप्रसवः॥ इतिप्रसवसूक्तं। इत्यैकाहिकानिसपाशुकानिचा
तुर्मास्यानिसमाप्तानि॥ श्रीरस्तुसर्वजगतः॥ ॥अथपाशुकानियांचाहिकचातुर्मास्यानि॥ त
त्रदशम्यांवैश्वानरपार्जन्येष्टिः। ततोऽपराह्णेप्राग्नावैष्णवीसकला॥ ततःएकादश्यांवैश्वदेवःप
शुः॥ तत्रवरणेविशेषः॥ प्रथमजगवपशुंदक्षिणेनसपशुंवैश्वदेवपर्वणाहंयक्ष्यइति। ततःपरि

© Dharmartha Trust J&K. Digitized by eGangotri

७९ समूहनादिपूर्वकमाहवनीयदक्षिणाग्न्योरन्तरालेसपशुर्वैश्वदेवपर्वार्थमिति। अग्निप्रणयनं। इध्मां
जनं॥ अग्निमंथनं। कंप्रपद्यादिसप्तदशसामिधेन्यः। आवाहने। अग्निमग्न आवह। सोममावह। विश्वां
देवानावह। वनस्पतिमावह। तत एकादशप्रयाजाः प्रैष्यप्रैषाः। अध्रिगोविशेषः॥ मेधपतिभ्योमे
धमिति। उत्तमप्रयाजानंतरंसहृताज्यभागौसप्रैषौ। ततःप्रधानयागः विश्वेभ्योदेवेभ्यश्छागस्य
वपायैमेदसोनुब्रूहीत्युक्ते। विश्वेअद्यमरुतोविश्वऊती विश्वेभवंत्व ग्नयःसमिद्धाः। विश्वेनोदेवा
अवसागमंतुविश्वमस्तुद्रविणंवाजोअस्मे३ग्नू। इतिवपायाःपुरोनु०। विश्वेभ्योदेवेभ्यश्छागस्य
वपांमेदःप्रेष्येत्युक्ते। होतायक्षद्विश्वेदेवास्योछागस्यवपायामेदसोजुषंतांहविर्होतर्यज। ततो
होता। ये०ये० हेयेकेचज्मामहिनोअहिमायादिवोजज्ञिरेअपांसधस्थे। तेअस्मभ्यमिषयेविश्व
मायुःक्षपउस्रावरिवस्यंतुदेवाः४वौषट्॥ इतियाज्या॥ ततःपशुपुरोडाशयागः। विश्वेभ्यो राम ७९

79

देवेभ्यः पुरोडाशस्यानुब्रूहीत्युक्ते। यं देवासो वथवाजमानो यं त्रायध्वे यं पिपृथात्यंहः॥ यो वो गोपी
थेन भयस्य वेद ते स्याम देववीतये तुरासो ३॥ इति पशुपुरोडाशस्य पुरोनु०। विश्वेभ्यो देवेभ्यः पु
रोडाशं प्रेष्येत्युक्ते। होता यक्षद्विश्वे देवाः पुरोलाशस्य जुषंतां हविर्होतर्यज। ततो होता। ये३ यजामहे
ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि संति देवाः। तां अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं ना
सत्या पुरंधीं ४ वौ४षट्। ३ ऊ॥ इति याज्या॥ पशुपुरोडाशमनु चातुर्मास्य देवता यथा पर्वं अग्निः
सोमः सविता सरस्वती पूषा मरुतः स्वतवसो विश्वे देवा द्यावापृथिवी इति॥ याज्यानुवाक्याः सूर्य
वत्॥ होतैव पठति। यजप्रैष॥ स्वात्संप्रदानस्य। ततः पाशुकः॥ स्विष्टकृदेकाहिकवत्॥ प्रेष्यप्रैषः
कात्यायनानां तु यजप्रैषः। ततइलोपह्वानादि। ततो दक्षिणा॥ तत्र विशेषो भिमर्शने। पशुप्र
यमजगवमसीति। संकल्पे। अस्य सपशु वैश्वदेवपर्वणः॥ समृध्यर्थं पशुं प्रथमजं गां वदक्षिणां

© Dharmartha Trust J&K. Digitized by eGangotri

८० ब्रह्मण इत्यादि विशेषः। चातुर्मास्यपशुदक्षिणाः पाशुकानीति स्मृतात्। अथ पशुप्रचारः। तत्र
80 मनोतासूक्तं पूर्ववत्। ततो विश्वेभ्यो देवेभ्यश्छागस्य हविषोऽनुब्रूहीत्युक्तो। लोर्लेवर्हिः। षिसमिधा
नेमग्नेरूक्तेन महानमसाविवासे। अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वो३ष्।
इति पशोः पुरोनु। विश्वेभ्यो देवेभ्यश्छागस्य हविः प्रेष्येत्युक्तो। होता यक्षद्विश्वे देवाञ्छागस्य हवि
ष आदत्त्यमद्ध्यतो मेद उद्धृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः घसन्नूनं घासे अज्राणां यवस
प्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शि
व तामत उत्सादतो ऽङ्गादङ्गादवत्तानां करदेवं विश्वेदेवा जुषन्तां हविर्होतर्यज। ततो होता। ३ये३ हे वि
श्वेदेवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्
बर्हिषि मादयध्वं ४ वौ ४ षट्। ऊर्जः। इति याज्या। अत्र याज्यानुवाक्ययोर्विपर्यासः। ततो यातयाम एम
८०

तद्दोषनिवृत्त्यर्थं। नाचोयं सुत्वंधयस्यावत्। पयस्यायाः पशुविकारत्वात्तद्विकृतेश्च प्रकृतौ धर्मा
नतिदेशात्। ततो वनस्पतियागः सर्वेषः पूर्ववत्॥ यत्र विश्वेषां देवानां छागस्य हविषः प्रियाधा
मानीति तत्र विशेषः॥ ततः स्विष्टकृद्यागः॥ तत्रापि होतायक्षदग्निं स्विष्टकृतमयालग्निर्वि
श्वेषां देवानां छागस्य हविषः प्रियाधामानीति विशेषोऽन्यदेकाहिकेन सपशुनासमानं। तत ए
कादशानुयाजाः सर्वेषाः। सूक्तावाकेऽप्येत्तु को मैत्रावरुणः। अग्निमद्य होतारमवृणीतायं यजमानः
पचन्पक्तीः पचन्पुरोलाशं वध्नन्विश्वेभ्यो देवेभ्यः छागं। सूपस्था अद्य देवो वनस्पतिरभवद्वि
श्वेभ्यो देवेभ्यः छागेन। अघस्तं संमेदस्तः प्रतिपचताग्रभीषुरवीवृधंत पुरोलाशेन। त्वामद्य ऋ
ष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आसंगतेभ्यः। एषमे देवेषु वसुवार्यायक्ष्यत
इति ताया देवा देवदाना न्यदुरस्मान्यस्मा आ च शास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो

© Dharmartha Trust J&K. Digitized by eGangotri

८२ माज्ञषः स्त्रकृवा कायस्त्माद्भूर्ध्वहि। अत्र यवग्मुरोलाशाभिमृसेन भवति॥ अत्रल्पानाम नूहेनेति परि
४ भाषितत्वात्॥ ततआहवनीये दंडप्रक्षेपः। ततो होताइदं द्यावापृथिवीत्यादितयोरा विदा संपठित्वा॥ तं
अग्निर्हविरःकृत। सोमो हविरःकृत। विश्वेदेवा हविरजुषंताः कृत। वनस्पतिः कृत। देवा आज्यपाइ
त्यादि। वाजिनो देवा हविर्जोषयिष्यं तइत्यादिसमानं। ततो वाजिनयागः पूर्ववत्॥ पत्नीसंयाजादि
हृदयशूलोपस्थानांतं समानं। इति सपशुवैश्वदेवं पर्व॥ ॥०॥ ततः सपशुवरुणप्रघासाः॥ त
त्रवारुणामारुतौ वरुणप्रघासे क्षितिस्त्रात्वशांखायनानां पशुद्वयं भवति। कात्यायनानां तु वारुण
एव न मारुतः तत्रस्वशाखानुसारेण होतव्यं। अत्र वरुणे विशेषः सपशुवरुणप्रघासे पुणापशुमिथु र्व
नगवहक्षिणेनाहंयस्य इति॥ सपशुवरुणप्रघासार्थमिति आद्याहवनीयदक्षिणश्योरंतरे विशे
षः अग्न्याधानं॥ अग्निप्रणयनादि समानं पूर्णां जनं त्त्रतरे विहारे भवति। उत्तरे पशुद्वयं नीतिम एम ८२

© Dharmartha Trust J&K. Digitized by eGangotri

हाकौषीतविकृतेः॥ कंस्व्यपद्यादिसर्वं शासामिधेन्यः। अग्नीमहांतोस्थो ब्राह्मणो वित्साद्य हः समा
नः। आवाहने। अग्निमग्नी आवहतं। सोम·तं। वरुणमावहतं। मरुतआवहतं। वनस्पतिमावहतं॥ देवां
इत्यादिसमानं॥ ततएकादशप्रयाजाः सप्रैषाः। तत्राधिगो विशेषः पशुद्वित्वे। देव्याः शमितारो मे
धो। ताभ्यामग्निर्बर्हिरित्वेनोमा·थ्यः। उदीचीनां एनयोः शरीरे। एकधैकधेनयोस्त्वचमाच्छ्यतात्
रंत पुरात्तुरा०वपे उत्खिदतादंतरेवो·त्म्। द्विधेनयोरितिवा। श्येनमेनयोर्वक्षसी·वाहूनच्छलादोषाणि
कश्यपेयांसानच्छिद्राः श्रोणीः कवषोरू स्त्रेकपर्णाष्ठीवतः। षड्विंशतिः षड्विंशतिरेनयोर्वंक्रयः०त्रमेनयो
रनूक्ति। द्वापंचाशदेनयोर्वंक्रयइतिवा। ऊ०त्म्॥ अस्ना·त्म्॥ वनिष्ठूएनयो·र्माराविष्टोरूकेम·रइति॥ यद
त्वध्वर्युवर्क्षीत्वावारुणएवतदामेधपतयइत्येवविशेषः अन्यत्प्रकृतिवत्। अथप्रधानयागः तत्रव
पायागः अध्वर्युणा वरुणायच्छागस्यवपायेमेदसो ऽनुब्रूहीत्युक्ते॥ मैत्रावरुणः अस्त्रेन्द्राद्यामहुरोविश्व

© Dharmartha Trust J&K. Digitized by eGangotri

६२ वेदा अमिमीत वरिमाणं पृथिव्याः। आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानीत्युइति

वरुणस्य पुरोनुवाक्यामाह्। ततो वरुणाय छागस्य वपां मेदः प्रेष्येत्युक्ते॥ होता यक्षद्वरुणं छागस्य वपा

यामेदसो जुषतां हविर्होतर्यज। ततो होता॥ ऊं॰ ये॰ ह्एवावं दस्य वरुणं बृहं तं नमस्याधी श[illegible]मृतस्य

गोपां। स नः शर्म त्रिवरूथं वियंसत्पात नो द्यावापृथिवी उपस्थे३ इ वौषट्। उजः॥ इति याज्या। ततः

शांत्वायनानां मारुतव[illegible]पा[illegible]यागः॥ मरुद्भ्यश्छागस्य वपायै मेदसोनुब्रूहीत्युक्ते॥ गोमदश्वावद्

रथवत्सुवीरं चंद्रवद्राधो मरुतो ददा नः। प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोवसो दैव्यस्यो३ मू।

इति मरुतां पुरोनुवाक्या॥ मरुद्भ्यः छागस्य वपां मेदः प्रेष्येत्युक्ते होता यक्षन्मरुद्भ्यः छागस्य व

पाया मेदसो जुषंतां हविर्होतर्यज॥ ततो होता॥ ऊं॰ ये हेराइवेदवरमा अहेव प्रप्रजायंते अक

वा महोभिः। पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः संमिमिक्षुर्वौषट्। उजः॥ इति याज्या। राम ८२

© Dharmartha Trust J&K. Digitized by eGangotri

ततः पशुपुरोलाशयागः। वरुणाय पुरोलाशस्यानुब्रूहीत्युक्ते। तत्त्वायामि ब्रह्मणा वंदमानस्तदाशा
स्ते यजमानो हविर्भिः। अहेलमानो वरुणेह बोध्युरुशंसमा न आयुः प्रमोषी३ः। इति वारुणपशोः
पुरोडाशस्य पुरोऽनु०। वरुणाय पुरोडाशं प्रेष्येत्युक्ते॥ होता यक्षद्वरुणः पुरोलाशस्य जुषतां हवि
र्होतर्यज। होता॥ मूं०ये३ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि। ययाति विश्वा दु
रिता तरेम सुतर्माणमधि नावं रुहेमा वौषट्॥ ईजः॥ इति याज्या॥ मरुद्भ्यः पुरोडाशस्यानुब्रूहीत्यु
क्ते॥ हये नरो मरुतो मृलता नस्तुवीमघासो अमृता ऋतज्ञाः। सत्यश्रुतः कवयो युवानो बृहद्गिर
यो बृहदुक्षमाणो३मू॥ इति मरुतां पुरोलाशस्य पुरोऽनुवाक्या॥ मरुद्भ्यः पुरोलाशं प्रेष्येत्युक्ते। होता
यक्षन्मरुतः पुरोलाशस्य जुषंतां हविर्होतर्यज॥ होता॥ मूं०ये० हे यावः शर्म शशमानाय संति त्रि
धातूनि दाशुषे यच्छताधि। अस्मभ्यं तानि मरुतो वियंत रयिं नो धत्त वृषणः सुवीरं वौषट्॥ ईजः॥

© Dharmartha Trust J&K. Digitized by eGangotri

८५ इतियाज्या॥पशुपुरोलाशमनुवाक्येस्य देवतायथापर्वैस्तुक्तत्वात्॥अग्नेःसोमस्यसवितुःसरस्वत्याः
पूष्ण इंद्राग्न्योर्वरुणस्यमरुतांकस्य च यागः।याज्यानुवाक्या ऐष्टिकवरुणप्रघासवत्होत्रापठनीयाः।
यजप्रैषत्वात्संप्रदानस्य।ततःपाशुकःस्विष्टकृद्दैकाहिकवत्प्रैषप्रैषःशांखायनानां।ततइलोपह्वा
नादि॥दक्षिणाभिमर्शनेविशेषः।पशुमिथुनगवमसीति॥अस्यसपशुवरुणप्रघासपर्वणःसमृ
ध्यर्थंपशुंमिथुनौगावौचदक्षिणांब्रह्मणइत्यादिसंकल्पेविशेषः॥अथपशुप्रचारः॥तत्रशांखा
यनानांपशुहृदयात्मनोतायाआवृत्तिः।ततोवरुणायछागस्यहविषोनुब्रूहीत्युक्ते॥अवतेहेलो
वरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः।क्षयन्नस्मभ्यमसुरप्रचेताराजन्नेनांसिशिश्रथःकृतानीर
मू।इतिवरुणस्यपशोःपुरोनुवाक्या॥वरुणायछागस्यहविःप्रेष्येत्युक्ते॥होतायक्षद्वरुणंछाग राम
स्यहविषआदद्धं०गृभ्णः॥घस्त्नूनं०नां॥पार्थ्व०करदेवंवरुणोजुषतांहविर्होतर्यज॥होता॥ ८५

© Dharmartha Trust J&K. Digitized by eGangotri

पा २

ॐ० ये० हउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्र[थाया] अथावयमादित्यव्रतेतवानाग
सोअदितयेस्यामावौषट्। ईजः। इतियाज्या॥ ततोमरुद्भ्यश्छागस्यहविषोनुब्रूहीत्युक्ते। शुची
वोहव्यामरुतःशुचीनांशुचिंहिनोम्य[ध्व]रंशुचिभ्यः। ऋतेनसत्यमृतसापआयंछुचिजन्मानः
शुचयःपावकोऽस्तु। इतिमरुतांपशोःपुरोनुवाक्या। मरुद्भ्यःछागस्यहविःप्रेष्येत्युक्ते। होताय
क्षन्मरुतश्छागस्यहविषआदन्नद्य०गृभः॥ घसंतत्नूनं·नां। पार्श्वं·करन्नेवंमरुतोजुषंतांहवि
र्होतर्यज॥ होता॥ ॐ०ये०हे यूयस्मान्नयतवस्योअच्छानिरंहतिभ्योमरुतोगृणानाः। जुषध्वंनो
हव्यदातिंयजत्रावयंस्यामपतयोरयीणांवौषट्॥ ईजः। इतियाज्या॥ आवसाहोमादर्धवेविरा
व मःपूर्ववत्सर्वेत्र॥ ततोवनस्पतियागःसप्रैषःपूर्ववत्॥ प्रैषेविशेषः॥ होतायक्षद्वनस्पतिं·त॥

© Dharmartha Trust J&K. Digitized by eGangotri

८५ यत्रवरुणस्यछागस्यहविषःप्रियाधामानियत्रमरुतांछागस्यहविषःप्रियाधामानियत्रवनस्प
तेर्नि। तत्रैतौप्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्भायांसाविवकृत्वीकरदेवंदेवोवनस्पतिर्जुषतांह
विर्होतर्यजेति॥ ततःस्विष्टकृद्यागऐकाहिकवत्॥ तत्रप्रैषेविशेषः॥ होतायक्षदग्निंस्वि
ष्टकृतमयाळग्निर्वरुणस्यछागस्यहविषःप्रियाधामान्ययाण्मरुतांछागस्यहविषःप्रिया
धामान्ययाड्वनस्पतेरित्यादिसमानं॥ ततएकादशानुयाजाःसप्रैषाः॥ ततःसूक्तप्रैषे
सूक्तेमे॥ अग्निमद्यहोतारमवृणीतायंयजमानःपचन्पक्तीःपचन्पुरोडाशंबध्नन्वरु
णायमरुद्भ्यःछागौ॥ सूपस्थाअद्यदेवोवनस्पतिरभवद्वरुणायमरुद्भ्यःछागाभ्यां ८५
अघ्नंस्तोमेदस्तःप्रतिपचताग्रभीष्टुरवीवृधंतपुरोडाशाभ्यां। त्वामद्यऋषयइत्यादिसमानं॥

85

© Dharmartha Trust J&K. Digitized by eGangotri

कात्यायनानुरोधेन तु॥ अग्निमघ्य·पुरोलाशं वधन्नूवरुणाय छागं। सूपस्था· रमवद्वरुणायछा
गेन। अथाग्नेमेदस्तः प्रतिपचताग्रभीदवीहधतां पुरोला शेनेत्यादि समानं। ततो दंड प्रक्षेपः॥ ततो
होता इदं द्यावापृथिवीत्यादि· तयोरा विदि॥ अग्निः। सोमः। वरुणो ह विरकृत॥ मरुतो हविरस्तुवं
ता·कृत। वनस्पति·कृत। देवा आज्यपा इत्यादि वाजिनयागांतं वैश्वदेवेन पर्वणा समानं। ततं पत्नी
संयाजादि हृदयशूलोपस्थानांतं पूर्ववत्॥ इति सपशुवरुणप्रघासपर्वसमाप्तं॥ अथ साक
मेधाख्यं पर्व लिख्यते। तत्र पशुसाकमेधपर्वणा पशुपूर्वमदक्षिणेना हं यक्ष्य इति वरणे। सपशु
साकमेधाख्यपर्वार्थमित्युपूरणे। ततः पूर्वेद्युः पूर्वाह्णे अग्नयेनीकवते इष्टिर्मध्यंदिने सांतपनी
येष्टिः सायं गृहमेधीयेष्टिः प्रातः क्रैलिनी। ष्टिपुवऐष्टिकवत्॥ यथास्थानाइष्टयः पिण्डप्रोत्येति ब्रूतेः/

© Dharmartha Trust J&K. Digitized by eGangotri

महाहविषिमाहेंद्रःपशुः॥अग्निप्रणयनादिसर्वंपाशुकवैश्वदेवपर्ववत्॥आवाहने॥अग्निंसोमं॥
महेंद्रं॥वनस्पतिं॥देवाइत्यादि॥अध्रिगोमेधपतयेमेधमिति॥अन्यत्प्रयाजादिपूर्ववत्॥प्र
धाने॥महेंद्रायछागस्यवपायैमेदसोनुब्रूहीप्रेष्य॥सत्राहणंदाधृषिंतुम्रमिंद्रंमहामपारंवृषभं
सुवज्रं॥हंतायोवृत्रंसनितोतवाजंदातामघानिमघवासुराधो३मृ॥इतिमाहेंद्रस्यवपायाःपुरोनु
वाक्या॥महेंद्रायछागस्यवपांमेदःप्रेष्यप्रेष्य॥होतायक्षन्महेंद्रंछागस्यवपायामेदसोजुष
तांहविर्होतर्यज॥ततोहोता॥स्व॰येहेमहांतयोवावृधेवीर्यायसमाचक्रेवृषभःकाव्येन॥इंद्रोभ
गोवाजदाअस्यगावःप्रजायंतेदक्षिणाअस्यपूर्वीर्वौषट्॥उज॥इतियाज्या॥अथपशुपुरो राम
लाशप्रचारः॥महेंद्रायपशुपुरोलाशप्रचारः॥महेंद्रायपुरोडाशस्यानुब्रूहीप्रेष्य॥त्वंमहांइंद्रतु ८६

© Dharmartha Trust J&K. Digitized by eGangotri

भ्यंहत्वा अनुकृत्वं मंह्नामन्यतद्यौः ॥ त्वंवृत्रंशवसाजघन्वांत्सृजंसिंधूंरहिनाजग्रसानो३म् ॥ इति
माहेंद्रस्यपशुपुरोडाशस्यपु० ॥ महेंद्रायपुरोडाशंप्रेष्येत्युक्ते मै० ॥ होतायक्षन्महेंद्रःपुरोडाश
स्यजुषतांहविर्होतर्यज ॥ शू० ये० हेयुध्मस्यतेवृषभस्यस्वराजउग्रस्ययूनस्थविरस्यघृष्वेः ॥ अजूर्य
तोवज्रिणोवीर्याणीन्द्रश्रुतस्यमहतोमहानी४वौ४षट् ॥ उजः ॥ इतियाज्या ॥ ततश्चातुर्मास्यदेव
तायथापर्व ॥ आग्नेयःसौम्यःसावित्रःसारस्वतःपौष्णऐंद्राग्नोमाहेंद्रोवैश्वकर्मणश्चेति ॥ याज्यापुरो
नुवाक्याऐष्टिकवत् ॥ ततःपशुकस्विष्टकृद्धरणप्रघासवत् ॥ ततइलोपह्वानादि ॥ दक्षिणाभि
मर्शनेविशेषः पशुर्षभमसीति ॥ अस्यसपशुसाकमेधाख्यपर्वणःसमृध्यर्थेपशुंऋषभंचद
क्षिणांब्राह्मणाइत्यादिसंकल्पेविशेषः ॥ अथपशुप्रचारः ॥ ततश्चमनोतासूक्तंवैश्वदेवपर्ववत् ॥ ततोम

© Dharmartha Trust J&K. Digitized by eGangotri

अत्रयथोक्तापिश्या ।१

८७ हेंद्रायछागस्यहविषोनुब्रूहीत्युक्ते॥ महोमहानिपनयंत्यस्येंद्रस्यकर्मसुकृतापुरूणि॥ वृजने
न वृजिनांत्सं पिपेषमायाभिर्दस्यूंरभिभूत्योजाः॥ इतिमाहेंद्रस्यपशोःपुरोनुवाक्या॥ महेंद्राय
छागस्यहविःप्रेष्येत्युक्ते॥ होतायक्षन्महेंद्रंछागस्यहविषआदद्य॰ष्टुभः॥ यस्तुनूनं॰नां॥ प
त्नीनांकरदेवंमहेंद्रोजुषतांहविर्होतर्यज॥ ततोहोता॥ स्तु॰ये॰हेमहत्त्वआयतनवसेसुवृक्तिंभिरयस्वि
वृतमायपश्वः॥ गिर्वाहसेगिरइंद्रायपूर्वीर्धेहितन्वेकुविदंगवेदा४हो४षट्॥ ईजः॥ अत्राहदेवैवि
रमेदावसाहोमात्॥ इतियाज्या॥ ततोवनस्पतियागःपूर्ववत्॥ यत्रमहेंद्रस्यछागस्यहविषःप्रि
याधामानीतिप्रैषेविशेषः॥ ततःस्विष्टकृद्यागऐकाहिकवत्॥ तत्रप्रैषेविशेषः॥ होतायक्षदग्निं
स्विष्टकृतमयालग्निर्महेंद्रस्यछागस्येत्यादिसमानं॥ ततएकादशानुयाजाःसप्रैषाः॥ ततःसूक्तावे राम ८७

87

© Dharmartha Trust J&K. Digitized by eGangotri

षीत्युक्ते मैत्रावरुणः॥ अग्निमद्यहोतारमवृणीतायं॰ वयन्नमहेंद्रायछागं॥ सूपस्था॰ रभवन्नमहें
द्रायछागेन॥ अथवंमे॰ ताअभीदवीवृधतांपुरोलाशेन। त्वामद्येत्यादिसमानंदंडप्रक्षेपांतं॥ ततो
ता हौइदंद्यावापृथिवीत्यादिसोमोहविरित्यंतंपठित्वा॥ महेंद्रोहविरजुषता॰ कृत॥ वनस्पतिहेविर॰
कृत॰ देवाआज्यपाइत्यादिपठेत्॥ नवाजिनंनावभृथः॥ अन्यत्पत्नीसंयाजादिहृदयशूलोपस्था
नांतंसमानंवरुणप्रघासैः॥ इतिसपस्तुशाकमेधाख्यंपर्वसमाप्तं॥ अथसपस्तुस्तुनासीर्यपर्वनिरू
प्यते॥ तत्रसपस्तुस्तुनासीर्येणापर्वणाहंयक्ष्य इतिवरणे॥ सपस्तुस्तुनासीर्यपर्वार्थमित्युद्धरणे॥ अ
ग्निप्रणयनादिसपस्तुवैस्तुदेवपर्ववत्॥ अत्रस्तुनासीराभ्यांपस्तुः॥ आवाहने॥ अग्निंसोमं॥ स्तुनासी
रावावह॥ वनस्पतिमावहेत्यादि॥ एकादशप्रयाजाःसप्रैषाः॥ अग्निगोमेधपतिभ्यांमेधमितिविशे

© Dharmartha Trust J&K. Digitized by eGangotri

७७ षः॥ सद्वंतावाज्यभागौ॥ अथ प्रधानयागः॥ शुनासीराभ्यां छागस्य वपायै मेदसोऽनुब्रूहीत्युक्ते॥
इंद्रस्य न शुनासीरा विमं यज्ञं मिमिक्षतां॥ गर्भं धत्तं स्वस्त्वयो३स्तु॥ इति शुनासीरपशुवपायाः पुरो
नुवाक्या॥ शुनासीराभ्यां छागस्य वपां मेदः प्रेष्येत्युक्ते॥ होता यक्षच्छुनासीरौ छागस्य वपाया मेद
सो जुषेतां हविर्होतर्यज॥ ततो होता॥ ॐ॰ये॰हे ययोरिदं विश्वं भुवनमाविवेश ययोरानंदो निहि
तो महश्च॥ शुनासीरावृतुभिः संविदानौ इंद्रवंता हविरिदं जुषेथां वौ४षट्॥ उजः॥ इति याज्या॥
अथ पुरोडाशप्रचारः॥ शुनासीराभ्यां पुरोडाशस्यानुब्रूहीत्युक्ते॥ इंद्राय शुनासीराय स्त्रुचा जुहु
त ना हविः॥ जुषतां प्रतिमेधिरो३स्तु॥ इति पशुपुरोडाशस्य पुरो॰ शुनासीराभ्यां पुरोडाशस्यानु
ब्रूहीत्युक्ते॥ होता यक्षच्छुनासीरौ पुरोडाशस्य जुषेतां हविर्होतर्यज॥ ततो होता॥ ॐ॰ये॰हे प्रहव्या राम ७७

© Dharmartha Trust J&K. Digitized by eGangotri

नि घृतवंत्पस्मै हर्यश्वाय भरतासजोषाः ॥ इंद्रश्च सुभिर्व्रह्मणा संविदानः शुनासीरी हविरिदंजुष
स्वा ४ वौ ४ षट् ॥ ऊंजः ॥ इति याज्या ॥ पशुपुरोडाशमनुयौस्मांतानि वैश्वदेविकानि शुनासीरो वा शुः
नूर्यस्य ॥ याज्यानुवाक्याः ऐष्टिकवत् ॥ ततः पाशुकत्विक्कृत् ॥ महाकौषीतकिश्रुतेः ॥ तत इलोपह्वा
नादि ॥ दक्षिणाभिमर्शने विशेषः । पशुश्वेताश्वमसीति ॥ पशुद्वादशायोगसीरमसीति वा ॥ अस्य स
पशुशुनासीरीयपर्वणः समृध्यर्थं पशुं श्वेताश्वं च दक्षिणां ॥ पशुं द्वादशायोगसीरं च दक्षिणामि
ति वा ॥ ब्रह्मण इत्यादि समानं ॥ अथ पशुप्रचारः ॥ तत्र मनोतास्थाने पूर्ववत् ॥ शुनासीराभ्यां छाग
स्य हविषोनुब्रूहीत्युक्ते ॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरेनृतमं वाजसातौ ॥ शृण्वंतमुग्रमूत
ये समत्सु घ्नंतं वृत्राणि संजितं धनानो ३ म् ॥ इति शुनासीरपशोः पुरोनु० । शुनासीराभ्यां छागस्य हविः

© Dharmartha Trust J&K. Digitized by eGangotri

८९ प्रेष्येत्युक्ते। होता यक्षच्छुनासीरौ छागस्य हविष आत्तामद्य॰ गृभः॥ यत्त्वां नूनं॰ करत एवं शुनासीरौ जुषे
89 तां हविर्होतर्यज॥ ततो होता॥ शुं॰ये॰हे स्वायंतो गव्यंतो वाजयंतो हवामहे त्वोपगंतवा उ॥ आभूषंतस्त्वे सु
मतौ नवा यी वयमिंद्र त्वा शुनं हुवेमा ४ वौ ४ षट्॥ ऊर्जः॥ अत्रार्द्धर्चे विरमेदावसा होमात्॥ इति याज्या॥
ततो वनस्पतियागः पूर्ववत्॥ यत्र शुनासीरयोश्छागस्य हविषः प्रिया धामानीति प्रैषे विशेषः॥ ततः
स्विष्टकृद्यागः ऐकाहिकवत्॥ होता यक्षदग्निं स्विष्टकृतमयाळग्निः शुनासीरयोः छागस्य हवि
षः प्रिया धामानीति प्रैषे विशेषोन्यत्समानं॥ तत इळोपह्वानाद्येकादश प्रैषान्नुयजां तं पूर्ववत्॥ त
तः सूक्ता प्रेष्येत्युक्ते मैत्रावरुणः॥ अग्निमद्य होतारमवृणीतायं॰ वध्नञ्छुनासीराभ्यां छागं॥ सू राम
पस्था॰ रभवच्छुनासीराभ्यां छागेन॥ अघस्तां तं मेदस्तः प्रतिपचताग्रभीष्टामवीवृधेतां पुरोळाशेन। ८९

© Dharmartha Trust J&K. Digitized by eGangotri

त्वामद्यऋषयइत्यादिपूर्ववद्दंउप्रैषांतं॥ ततोहोताइदंद्यावापृथिवीत्यादिसोमोहविरित्यंतेशुनासीरौहवि
रज्जुषेतामवीवृधेतांमहोज्यायोकातां॥ वनस्पतिर्हविरज्जुषतावीवृधतमहोज्यायोक्रतादेवाआज्यपाइत्या
दिपठेत्॥ नवाजिनंनावभृथः॥ समानमन्यद्वैश्वदेवेनेत्यतिदेशात्॥ पत्नीसंयाजादिहृदयशूलोपस्थानां
तंपूर्ववत्॥ इतिसपशुशुनासीरीयंपर्वसमाप्तंमंथनपक्षे॥ अमंथनपक्षेतुपंचप्रयाजाइत्याद्यैष्टिक
वत्पौर्णमासमेवतंत्रंभवति॥ पशुषुपुनमध्यतेपौर्णमासमेवतंत्रंभवतीतिस्मृतेः॥ अथवायायादेवता
चातुर्मास्येषुतस्यैतस्यैपशुःकर्तव्यः॥ यथादेवतंवापशवइतिस्मृतेः। एतस्मिंश्चपक्षेपशुसंख्यायूपाः
कर्तव्याः॥ तद्यथाख्यातमेकादशिन्याइतिस्मृतेः॥ उक्तपक्षेएववक्ष्यमाणोविशेषः॥ महाहविषिआनीक
वतादयःपंचपशवःप्रथमतःकर्तव्याःसांतआग्नेयाद्यष्टाविति॥ तथाचमहाकौषीतकिःस्मृतिः॥ आना

© Dharmartha Trust J&K. Digitized by eGangotri

९० कवतः सांतपनो गृहमेधीयः क्रैलिनो मैत्रस्त्वमहाहविषीति॥ अथवा॥ पर्वणि पर्वणि समाप्ते वा ऐन्द्रा
ग्नः पशुः कर्त्तव्यः॥ पर्वणि पर्वणि वा संस्थित ऐन्द्राग्न इति श्रुतेः॥ एतस्मिंस्त्वपक्षे अन्यत्सर्वं मैष्टिके त्वा
तुर्मास्ये तुल्यं॥ समानमन्यदिति श्रुतेः॥ तेन पशुपुरोलाशमन्त्रचातुर्मास्यदेवता इति न भवति॥ का
त्यायनानां त्वपक्षद्वयमन्यदप्यस्ति॥ सर्वेषु पर्वस्तु पर्वारंभात्प्रागेव वैश्वदेवादिः स्वस्वः पशुः पृथ
कृतंत्रः कर्त्तव्यः। पशुसमाप्त्यनंतरं पर्व॥ अस्मिंस्त्वपक्षे साकमेधेष्वमहाहविषः प्राक्पशुरिति॥ ॥
अथवा॥ पर्वणि पर्वणि समाप्ते पृथक्तंत्रो वैश्वदेवादिः स्वस्वः पशुर्भवति। अस्मिन्नपक्षे महा
हविषोनंतरंपि त्र्यैष्टिः प्राक्पशुर्भवति। उभयपक्षेपि पर्वदक्षिणे वेति। तथा च कात्यायन ९०
सूत्रं। पुरस्ताद्वा पर्वणः पर्वणोंते वेति। इति पाशुकानि चातुर्मास्यानि समाप्तानि॥ ॥ ॥ बा

© Dharmartha Trust J&K. Digitized by eGangotri

एवेदमुनिचंद्रवत्सरे शुक्रशुक्लगुरुपंचमीदिने। याससमाप्तिमगमत्तु बोधिनी सा तनोतु वि
हरिरेव मंगलं ॥२॥ ॥४॥ वैकुंठरचितार्थप्रकाशिः तु बोधिन्याः तु त्वप्रदा॥ ॥ भूयात्तपार
91 शरीरदृष्टा काश्यां भाष्यं च धीमतां ॥३॥ ॥ संवत् १७४५ श्रावणे कृष्णपक्षे षष्ठी रवौ लि
खितमिदं पुस्तकं काश्यां शुकदेवब्राह्मणेन ॥ श्रीरस्तु ॥ श्रीभवायनमः ॥ शिवं मंगलं ॥

श्रीशुकदेवस्यारे

९१

© Dharmartha Trust J&K. Digitized by eGangotri

८१



© Dharmartha Trust J&K. Digitized by eGangotri